श्रीमद्वाग्भटविरचिते
अष्टाङ्गहृदये शारीरस्थानम्
प्रथमोऽध्यायः

अथातो गर्भावक्रान्तिं शारीरं व्याख्यास्यामः
इति ह स्माहुरात्रेयादयो महर्षयः
शुद्धे शुक्रार्तवे सत्वः स्वकर्मक्लेशचोदितः
गर्भः सम्पद्यते युक्तिवशादग्निरिवारणौ १
बीजात्मकैर्महाभूतैः सूक्ष्मैः सत्वानुगैश्च सः
मातुश्चाहाररसजैः क्रमात्कुक्षौ विवर्द्धते २
तेजो यथाऽर्करश्मीनां स्फटिकेन तिरस्कृतम्
नेन्धनं दृश्यते गच्छत्सत्वो गर्भाशयं तथा ३
कारणानुविधायित्वात्कार्याणां तत्स्वभावता
नानायोन्याकृतीः सत्वो धत्तेऽतो द्रुतलोहवत् ४
अत एव च शुक्रस्य बाहुल्याज्जायते पुमान्
रक्तस्य स्त्री तयोः साम्ये क्लीबः शुक्रार्तवे पुनः ५
वायुना बहुशो भिन्ने यथास्वं बह्वपत्यता
वियोनिविकृताकारा जायन्ते विकृतैर्मलैः ६
मासि मासि रजः स्त्रीणां रजसं स्रवति त्र्यहम्
वत्सराद्द्वादशादूर्ध्वं याति पञ्चाशतः क्षयम् ७
पूर्णषोडशवर्षा स्त्री पूर्णविंशेन सङ्गता
शुद्धे गर्भाशये मार्गे रक्ते शुक्रेऽनिले हृदि ८
वीर्यवन्तं सुतं सूते ततो न्यूनाब्दयोः पुनः
रोग्यल्पायुरधन्यो वा गर्भो भवति नैव वा ९
वातादिकुणपग्रन्थिपूयक्षीण मलाह्वयम्
बीजासमर्थं रेतोस्त्रम् स्वलिङ्गैर्दोषजं वदेत् १०
रक्तेन कुणपं श्लेष्मवाताभ्यां ग्रन्थिसन्निभम्
पूयाभं रक्तपित्ताभ्यांक्षीणं मारुतपित्ततः ११
कृच्छ्राण्येतान्यसाध्यं तु त्रिदोषं मूत्रविट्प्रभम्
कुर्याद्वातादिभिर्दुष्टे स्वौषधम् कुणपे पुनः १२
धातकीपुष्पखदिरदाडिमार्जुन साधितम्

पाययेत्सर्पिरथवा विपक्वमसनादिभिः १३
पलाशभस्माश्मभिदा ग्रन्थ्याभे पूयरेतसि
परुषकवटादिभ्याम् क्षीणे शुक्रकरी क्रिया १४
संशुद्धो विट्प्रभे सर्पिर्हिङ्गुसेव्यादि र्गिसि साधितम्
पिबेत् ग्रन्थ्यार्तवे पाठाव्योषवृक्षकजं जलम् १५
पेयं कुणपपूयास्रे चन्दनं वक्ष्यते तु यत्
गुह्यरोगे च तत्सर्वं कार्यं सोत्तरबस्तिकम् १६
शुक्रं शुक्लं गुरु स्निग्धं मधुरं बहलं बहु
घृतमाक्षिकतैलाभं सद्गर्भाय ऋार्तवं पुनः १७
लाक्षारसशशास्राभं धौतं यच्च विरज्यते
शुद्धशुक्रार्तवं स्वस्थं संरक्तं मिथुनं मिथः १८
स्नेहैः पुंसवनैः स्निग्धं शुद्धं शीलितबस्तिकम्
नरं विशेषात्क्षीराज्यैर्मधुरौषधसंस्कृतैः १९
नारीं तैलेन माषैश्च पित्तलैः समुपाचरेत्
क्षामप्रसन्नवदनां स्फुरच्छ्रोणिपयोधराम् २०
स्वस्ताक्षिकुक्षिं पुंस्कामां विद्यादृतुमतीं स्त्रियम्
पद्मं सङ्कोचमायाति दिनेऽतीते यथा तथा २१
ऋृतावतीते योनिः सा शुक्रं नातः प्रतीच्छति
मासेनोपचितं रक्तं धमनीभ्यामृतौ पुनः २२
ईषत्कृष्णं विगन्धं च वायुर्योनिमुखान्नुदेत्
ततः पुष्पेक्षणादेव कल्याणध्यायिनी त्र्यहम् २३
मृजालङ्कार रहिता दर्भसंस्तरशायिनी
क्षैरेयं यावकं स्तोकं कोष्ठशोधनकर्षणम् २४
पर्णे शरावे हस्ते वा भुञ्जीत ब्रह्मचारिणी
चतुर्थेऽह्नि ततः स्नाता शुक्लमाल्याम्बरा शुचिः २५
इच्छन्ती भर्तृसदृशं पुत्रं पश्येत्पुरः पतिम्
ऋृतुस्तु द्वादश निशाः पूर्वास्तिस्रोऽत्र निन्दिताः २६
एकादशी च युग्मासु स्यात्पुत्रोऽन्यासु कन्यका
उपाध्यायोऽथ पुत्रीयं कुर्वीत विधिवद्विधिम् २७
नमस्कारपरायास्तु शुद्राया मन्त्रवर्जितम्

अवन्ध्य एवं संयोगः स्यादपत्यं च कामतः २८
सन्तो ह्याहुरपत्यार्थं दम्पत्योः सङ्गतिं रहः
दुरपत्यं कुलाङ्गारो गोत्रे जातं महत्यपि २९
इच्छेतां यादृशं पुत्रं तद्रूपचरितांश्च तौ
चिन्तयेतां जनपदांस्तदाचारपरिच्छदौ ३०
कर्मान्ते च पुमान् सर्पिःक्षीरशाल्योदनाशितः
प्राग्दक्षिणेन पादेन शय्यां मौहूर्तिकाज्ञया ३१
आरोहेत् स्त्री तु वामेन तस्य दक्षिणपार्श्वतः
तैलमाषोत्तराहारा तत्र मन्त्रंप्रयोजयेत् ३२
ॐ आहिरसि आयुरसि सर्वतः प्रतिष्ठासि धाता त्वां
दधातु विधाता त्वां दधातु ब्रह्मवर्चसा भवेति
ब्रह्मा बृहस्पितिर्विष्णुः सोमः सूर्यस्तथाऽश्विनौ
भगोऽथ मित्रावरुणौ वीरं ददतु मे सुतम् ३३
सान्त्वयित्वा ततोऽन्योन्यं संविशेतां मुदान्वितौ
उत्ताना तन्मना योषित्तिष्ठेदङ्गैः सुसंस्थितैः ३४
तथा हि बीजं गृह्णाति दोषैः स्वस्थानमास्थितैः
लिङ्गं तु सद्योगर्भाया योन्या बीजस्य सङ्ग्रहः ३५
तृप्तिर्गुरुत्वं स्फुरणं शुक्रास्रानुबन्धनम्
हृदयस्पन्दनं तन्द्रा तृड्ग्लानिर्लोमहर्षणम् ३६
अव्यक्तः प्रथमे मासि सप्ताहात्कललीभवेत्
गर्भः पुंसवनान्यत्र पूर्वं व्यक्तेः प्रयोजयेत् ३७
बली पुरुषकारो हि दैवमप्यतिवर्तते
पुष्ये पुरुषकं हैमं राजतं वाऽथवाऽयसम् ३८
कृत्वाऽग्निवर्णं निर्वाप्य क्षीरे तस्याञ्जलि पिबेत्
गौरदण्डमपामार्गं जीवकर्षभसैर्यकान् ३९
पिबेत्पुष्ये जले पिष्टानेकद्वित्रिसमस्तशः
क्षीरेण श्वेतबृहतीमूलं नासापुटे स्वयम् ४०
पुत्रार्थं दक्षिणे सिञ्चेद्वामे दुहितृवाञ्छया
पयसा लक्ष्मणामूलं पुत्रोत्पादस्थितिप्रदम् ४१
नासयाऽस्येन वा पीतं वटशुङ्गाष्टकं तथा

ओषधीर्जीवनीयाश्च बाह्यान्तरुपयोजयेत् ४२
उपचारः प्रियहितैर्भर्त्रा भृत्यैश्च गर्भधृक्
नवनीतघृतक्षीरैः सदा चैनामुपाचरेत् ४३
अतिव्यवायमायासं भारं प्रावरणं गुरु
अकालजागर स्वप्नं कठिनोत्कटकासनम् ४४
शोकक्रोधभयोद्वेगवेग श्रद्धाविधारणम्
उपवासाध्वतीक्ष्णोष्ण गुरुविष्टम्भिभोजनम् ४५
रक्तं निवसनं श्वभ्रकूपेक्षां मद्यमामिषम्
उत्तानशयनं यच्च स्त्रियो नेच्छन्ति तत्त्यजेत् ४६
तथा रक्तस्रुतिं शुद्धिं बस्तिमामासतोऽष्टमात्
एभिर्गभः स्रवेदामः कुक्षौ शुष्येन्म्रियेत वा ४७
वातलैश्च भवेद्गर्भः कुब्जान्धजडवामनः
पित्तलैः खलतिः पिङ्गः श्वित्रीपाण्डुः कफात्मभिः ४८
व्याधींश्चास्या मृदुसुखैरतीक्ष्णैरौषधैर्जयेत्
द्वितीये मासि कललाद्घनः पेश्यथवाऽबुदम् ४९
पुंस्त्रीक्लीबाः क्रमात्तेभ्यः तत्र व्यक्तस्य लक्षणम्
क्षामता गरिमा कुक्षेर्मूर्च्छा च्छर्दिररोचकः ५०
जृम्भा प्रसेकः सदनं रोमराज्याः प्रकाशनम्
अम्लेष्टता स्तनौ पीनौ सस्तन्यौ कृष्णचूचुकौ ५१
पादशोफो विदाहोऽन्ये श्रद्धाश्च विविधात्मिकाः
मातृजं ह्यस्य हृदयं मातुश्च हृदयेन तत् ५२
सम्बद्धं तेन गर्भिण्या नेष्टं श्रद्धाविमाननम्
देयमप्यहितं तस्यै हितोपहितमल्पकम् ५३
श्रद्धाविघाताद्गर्भस्य विकृतिश्च्युतिरेव वा
व्यक्तीभवति मासेऽस्य तृतीये गात्रपञ्चकम् ५४
मूर्द्धा द्वे सक्थिनी बाहू सर्वसूक्ष्माङ्गजन्म च
सममेव हि मूर्द्धाद्यैर्ज्ञानं च सुखदुःखयोः ५५
गर्भस्य नाभौ मातुश्च हृदि नाडी निबध्यते
यया स पुष्टिमाप्नोति केदार इव कुल्यया ५६
चतुर्थे व्यक्तताऽङ्गानां चेतनायाश्च पञ्चमे

षष्ठे स्नायुसिरारोमबलवर्णनखत्वचाम् ५७
सर्वैः सर्वाङ्गसम्पूर्णो भावैः पुष्यति सप्तमे
गर्भेणोत्पीडिता दोषास्तस्मिन् हृदयमाश्रिताः
कण्डूं विदाहं कुर्वन्ति गर्भिण्याः किक्विसानि च ५८
नवनीतं हितं तत्र कोलाम्बुमधुरौषधैः
सिद्धमल्पपटुस्नेहं लघु स्वादु च भोजनम् ५९
चन्दनोशीरकल्केन लिम्पेदूरुस्तनोदरम्
श्रेष्ठया वैणहरिणशशशोणितयुक्तया ६०
अश्वघ्नपत्रसिद्धेन तैलेनाभ्यज्य मर्दयेत्
पटोलनिम्बमञ्जिष्ठासुरसैः सेचयेत्पुनः ६१
दार्वीमधुकतोयेन मृजां च परिशीलयेत्
ओजोऽष्टमे सञ्चरति मातापुत्रौ मुहुः क्रमात् ६२
तेन तौ म्लानमुदितौ तत्र जातो न जीवति
शिशुरोजोनवस्थानान्नारी संशयिता भवेत् ६३
क्षीरपेया च पेयाऽत्र सघृताऽन्वासनं घृतम्
मधुरैः साधितं शुद्ध्यै पुराणशकृतस्तथा ६४
शुष्कमूलककोलाम्लकषायेण प्रशस्यते
शताह्वाकल्कितो बस्तिः सतैलघृतसैन्धवः ६५
तस्मिंस्त्वेकाहयातेऽपि कालः सूतेरतः परम्
वर्षाद्विकारकारी स्यात्कुक्षौ वातेन धारितः ६६
शस्तश्च नवमे मासि स्निग्धो मांसरसौदनः
बहुस्नेहा यवागूर्वा पूर्वोक्तं चानुवासनम् ६७
तत एव पिचुं चास्या योनौ नित्यं निधापयेत्
वातघ्नपत्रभङ्गाम्भः शीतं स्नानेऽन्वहं हितम् ६८
निःस्नेहाङ्गीं न नवमान्मासात्प्रभृति वासयेत्
प्राग्दक्षिणस्तनस्तन्या पूर्वं तत्पार्श्वचेष्टिनी ६९
पुन्नामदौर्हृदप्रश्नरता पुंस्वप्नदर्शिनी
उन्नते दक्षिणे कुक्षौ गर्भे च परिमण्डले ७०
पुत्रं सूतेऽन्यथा कन्यां या चेच्छति नृसङ्गतिम्
नृत्यवादित्रगान्धर्वगन्धमाल्यप्रिया च या ७१

क्लीबं तत्सङ्करे तत्र मध्यं कुक्षेः समुन्नतम्
यमौ पार्श्वद्वयोन्नामात्कुक्षौ द्रोणयामिव स्थिते ७२
प्राक् चैव नवमान्मासात् सा सूतिगृहमाश्रयेत्
देशे प्रशस्ते सम्भारैः सम्पन्नं साधकेऽहनि ७३
तत्रोदीक्षेत सा सूतिं सूतिकापरिवारिता
अद्यश्वःप्रसवे ग्लानिःकुक्ष्यक्षिश्लथता क्लमः ७४
अधोगुरुत्वमरुचिः प्रसेको बहुमूत्रता
वेदनोरूदरकटीपृष्ठ हृद्वस्तिवङ्क्षणे ७५
योनिभेदरुजातोदस्फुरण स्रवणानि च
आवीनामनु जन्मातस्ततो गर्भोदकस्रुतिः ७६
अथोपस्थितगर्भां तां कृतकौतुकमङ्गलाम्
हस्तस्थपुन्नामफलां स्वभ्यक्तोष्णाम्बुसेचिताम् ७७
पाययेत्सघृतां पेयां तनौ भूशयने स्थिताम्
आभुग्नसक्थिमुत्तानामभ्यक्ताङ्गीं पुनः पुनः ७८
अधो नाभेर्विमृद्नीयात्कारयेज्जृम्भचङ्क्रमम्
गर्भः प्रयात्यवागेवं तल्लिङ्गं हृद्विमोक्षतः ७९
आविश्य जठरं गर्भो बस्तेरुपरि तिष्ठति
आव्योऽभित्वरयन्त्येनां खट्वामारोपयेत्ततः ८०
अथ सम्पीडिते गर्भे योनिमस्याः प्रसारयेत्
मृदु पूर्वं प्रवाहेत बाढमाप्रसवाच्च सा ८१
हर्षयेत्तां मुहुः पुत्रजन्मशब्दजलानिलैः
प्रत्यायान्ति तथा प्राणाः सूतिक्लेशावसादिताः ८२
धूपयेद्गर्भसङ्गे तु योनिं कृष्णाहिकञ्चुकैः
हिरण्यपुष्पीमूलं च पाणिपादेन धारयेत् ८३
सुवर्चलां विशल्यां वा जराय्वपतनेऽपि च
कार्यमेतत्तथोत्क्षिप्य बाह्वोरेनां विकम्पयेत् ८४
कटीमाकोटयेत्पाष्ण्या स्फिजौ गाढं निपीडयेत्
तालुकण्ठं स्पृशेद्वेण्या मूर्ध्नि दद्यात्स्नुहीपयः ८५
भूर्जलाङ्गलिकीतुम्बी सर्पत्वक्कुष्ठसर्षपैः
पृथग्द्वाभ्यां समस्तैर्वा योनिलेपनधूपनम् ८६

कुष्ठतालीसकल्कं वा सुरामण्डेन पाययेत्
यूषेण वा कुलत्थानां बाल्वजेनासवेन वा ८७
शताह्वासर्ष पाजाजीशिग्रुतीक्ष्णकचित्रकैः
सहिङ्गुकुष्ठमदनैर्मूत्रे क्षीरे च सार्षपम् ८८
तैलं सिद्धं हितं पायौ योन्यां वाऽप्यनुवासनम्
शतपुष्पावचा कुष्ठकणासर्षपकल्कितः ८९
निरूहः पातयत्याशु सस्नेहलवणोऽपराम्
तत्सङ्गे ह्यनिलो हेतुः सा निर्यात्याशु तज्जयात् ९०
कुशला पाणिनाऽक्तेन हरेत्क्लृप्तनखेन वा
मुक्तगर्भापरां योनिं तैलेनाङ्गं च मर्दयेत् ९१
मक्कल्लाख्ये शिरोबस्तिकोष्ठशूले तु पाययेत्
सुचूर्णितं यवक्षारं घृतेनोष्णजलेन वा ९२
धान्याम्बु वा गुडव्योषत्रिजातकरजोन्वितम्
अथ बालोपचारेण बालं योषिदुपाचरेत् ९३
सूतिका क्षुद्वती तैलाद्घृताद्वा महतीं पिबेत्
पञ्चकोलकिनीं मात्रामनु चोष्णं गुडोदकम् ९४
वातघ्नौषधतोयं वा तथा वायुर्न कुप्यति
विशुध्यति च दुष्टास्रं द्वित्रिरात्रमयं क्रमः ९५
स्नेहायोग्या तु निःस्नेहममुमेव विधिं भजेत्
पीतवत्याश्च जठरं यमकाक्तं विवेष्टयेत् ९६
जीर्णे स्नाता पिबेत्पेयां पूर्वोक्तौषधसाधिताम्
त्र्यहादूर्ध्वं विदार्यादिवर्गक्वाथेन साधिता ९७
हिता यवागूः स्नेहाढ्या सात्म्यतः पयसाऽथवा
सप्तरात्रात्परं चास्यै क्रमशो बृंहणं हितम् ९८
द्वादशाहेऽनतिक्रान्ते पिशितं नोपयोजयेत्
यत्नेनोपचरेत्सूतां दुःसाध्यो हि तदामयः ९९
गर्भवृद्धि प्रसवरुक्क्लेदास्रस्रुतिपीडनैः
एवं च मासादध्यर्धान्मुक्ताहारादियन्त्रणा १००
गतसूताभिधाना स्यात्पुनरार्तवदर्शनात् १००-२

इति

श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायांद्वितीये शारीरस्थाने गर्भावक्रान्तिर्नाम प्रथमोऽध्यायः १

द्वितीयोऽध्यायः

अथातो गर्भव्यापदं शारीरं व्याख्यास्यामः
इति ह स्माहुरात्रेयादयो महर्षयः
गर्भिण्याः परिहार्याणां सेवया रोगतोऽथ वा
पुष्पेदृष्टेऽथवा शूले बाह्यान्तः स्निग्धशीतलम् १
सेव्याम्भोजहिम क्षीरिवल्ककल्काज्यलेपितान्
धारयेद्योनिबस्तिभ्यामार्द्रार्द्रान् पिचुनक्तकान् २
शतधौतघृताक्तां स्त्रीं तदम्भस्यवगाहयेत्
ससिताक्षौद्रकुमुद कमलोत्पलकेसरम् ३
लिह्यात् क्षीरघृतं खादेच्छृङ्गाटककसेरुकम्
पिबेत्कान्ताब्जशालूकबालो दुम्बरवत्पयः ४
शृतेन शालिकाकोलीद्विबलामधुकेक्षुभिः
पयसा रक्तशाल्यन्नमद्यात्समधुशर्करम् ५
रसैर्वा जाङ्गलैः शुद्धिवर्जं चास्त्रोक्तमाचरेत्
असम्पूर्णत्रिमासायाः प्रत्याख्याय प्रसाधयेत् ६
आमान्वये च तत्रेष्टं शीतं रूक्षोपसंहितम्
उपवासो घनोशीरगुडूच्यरलुधान्यकाः ७
दुरालभापर्पटकचन्दनाति विषाबलाः
क्वथिताः सलिले पानं तृणधान्यानि भोजनम् ८
मुद्गादियूषैरामे तु जिते स्निग्धादि पूर्ववत्
गर्भे निपतिते तीक्ष्णं मद्यं सामर्थ्यतः पिबेत् ९
गर्भकोष्ठविशुद्ध्यर्थमर्तिविस्मरणाय च
लघुना पञ्चमूलेन रूक्षां पेयां ततः पिबेत् १०
पेयाममद्यपा कल्के साधितां पाञ्चकौलिके
बिल्वादिपञ्चकक्वाथे तिलोद्दालकतण्डुलैः ११
मासतुल्यदिनान्येवं पेयादिः पतिते क्रमः
लघुरस्नेहलवणो दीपनीययुतो हितः १२

दोषधातुपरिक्लेदशोषार्थं विधिरित्ययम्
स्नेहान्नबस्तयश्चोर्ध्वं बल्यदीपनजीवनाः १३
सञ्जातसारे महति गर्भे योनिपरिस्रवात्
वृद्धिमप्राप्नुवन् गर्भः कोष्ठे तिष्ठति सस्फुरः १४
उपविष्टकमाहुस्तं बर्द्धते तेन नोदरम्
शोकोपवासरूक्षाद्यैरथवा योन्यतिस्रवात् १५
वाते क्रुद्धे कृशः शुष्येद्गर्भो नागोदरं तु तम्
उदरं वृद्धमप्यत्र हीयते स्फुरणं चिरात् १६
तयोर्बृंहणवातघ्नमधुरद्रव्य संस्कृतैः
घृतक्षीररसैस्तृप्तिरामगर्भांश्च खादयेत् १७
तैरेव च सुभिक्षायाः क्षोभणं यानवाहनैः
लीनाख्ये निस्फुरे श्येनगोमत्स्योत्क्रोशबर्हिजाः १८
रसा बहुघृता देया माषमूलकजा अपि
बालबिल्वं तिलान्माषान्सक्तूंश्च पयसा पिबेत् १९
समेद्यमांसं मधु वा कट्यभ्यङ्गं च शीलयेत्
हर्षयेत्सततं चैनामेवं गर्भः प्रवर्द्धते २०
पुष्टोऽन्यथा वर्षगणैः कृच्छ्राज्जायेत् नैव वा
उदावर्तं तु गर्भिण्याः स्नेहैराशुतरां जयेत् २१
योग्यैश्च बस्तिभिर्हन्यात्सगर्भां स हि गर्भिणीम्
गर्भेऽतिदोषोपचयादपथ्यैर्दैवतोऽपि वा २२
मृतेऽन्तरुदरं शीतं स्तब्धं ध्मातं भृशव्यथम्
गर्भास्पन्दो भ्रमतृष्णा कृच्छ्रादुच्छ्वसनं क्लमः २३
अरतिः स्रस्तनेत्रत्वमावीनामसमुद्भवः
तस्याः कोष्णाम्बुसिक्तायाःपिष्ट्वा योनिं प्रलेपयेत् २४
गुडं किण्वं सलवणं तथान्तः पूरयेन्मुहुः
घृतेन कल्कीकृतया शाल्मल्यतसिपिच्छया २५
मन्त्रैर्योगैर्जरायूक्तैर्मूढगर्भो न चेत्पतेत्
अथापृच्छ्येश्वरं वैद्यो यत्नेनाशु तमाहरेत् २६
हस्तमभ्यज्य योनिं च साज्यशाल्मलिपिच्छया
हस्तेन शक्यं तेनैव गात्रं च विषमं स्थितम् २७

आच्छनोत्पीडसम्पीड विक्षेपोत्क्षेपणादिभिः
आनुलोम्य समाकर्षेद्योनिं प्रत्यार्जवागतम् २८
हस्तपादशिरोभिर्यो योनिं भुग्नः प्रपद्यते
पादेन योनिमेकेन भुग्नोऽन्येन गुदं च यः २९
विष्कम्भौ नाम तौ मूढौ शस्त्रदारणमर्हतः
मण्डलाङ्गुलिशस्त्राभ्यां तत्र कर्म प्रशस्यते ३०
वृद्धिपत्रं हि तीक्ष्णाग्रं न योनाववचारयेत्
पूर्वं शिरःकपालानि दारयित्वा विशोधयेत् ३१
कक्षोरस्तालुचिबुकप्रदेशेऽन्यतमे ततः
समालम्ब्य दृढं कर्षेत्कुशलो गर्भशङ्कुना ३२
अभिन्नशिरसं त्वक्षिकूटयोर्गण्डयोरपि
बाहुं छित्त्वांऽससक्तस्य वाताध्मातोदरस्य तु ३३
विदार्य कोष्ठमन्त्राणि बहिर्वा सन्निरस्य च
कटीसक्तस्य तद्वच्च तत्कपालानि दारयेत् ३४
यद्यद्वायुवशादङ्गं सज्जेद्गर्भस्य खण्डशः
तत्तच्छित्त्वाऽहरेत्सम्यग्रक्षेन्नारीं च यत्नतः ३५
गर्भस्य हि गतिं चित्रां करोति विगुणोऽनिलः
तत्रानल्पमतिस्तस्मा दवस्थापेक्षमाचरेत् ३६
छिन्द्याद्गर्भं न जीवन्तं मातरं स हि मारयेत्
सहात्मना न चोपेक्ष्यः क्षणमप्यस्तजीवितः ३७
योनिसंवरणभ्रंशमक्कल्ल श्वासपीडिताम्
पूत्युद्गारां हिमाङ्गी च मूढगर्भां परित्यजेत् ३८
अथापतन्तीमपरां पातयेत्पूर्ववद्भिषक्
एवं निर्हृतशल्यां तु सिञ्चेदुष्णेन वारिणा ३९
दद्यादभ्यक्तदेहायै योनौ स्नेहपिचुं ततः
योनिर्मृदुर्भवेत्तेन शूलं चास्याः प्रशाम्यति ४०
दीप्यकातिविषारास्नाहिङ्ग्वेला पञ्चकोलकात्
चूर्णं स्नेहेन कल्कं वा क्वाथं वा तिां पाययेत्ततः ४१
कटुकातिविषापाठाशाकत्वग्घिङ्गु तेजिनीः
तद्वच्च दोषस्यन्दार्थं वेदनोपशमाय च ४२

त्रिरात्रमेवं सप्ताहं स्नेहमेव ततः पिबेत्
सायं पिबेदरिष्टं च तथा सुकृतमासवम् ४३
शिरीषककुभक्वाथपिचून् योनौ विनिक्षिपेत्
उपद्रवाश्च येऽन्येस्युस्तान् यथास्वमुपाचरेत् ४४
पयो वातहरैः सिद्धं दशाहं भोजने हितम्
रसो दशाहं च परं लघुपथ्याल्पभोजना ४५
स्वेदाभ्यङ्गपरा स्नेहान् बलातैलादिकान् भजेत्
ऊर्ध्वं चतुर्भ्यो मासेभ्यः सा क्रमेण सुखानि च ४६
बलामूलकषायस्य भागाः षट् पयसस्तथा
यवकोलकुलत्थानां दशमूलस्य चैकतः ४७
निष्क्वाथभागो भागश्च तैलस्य तु चतुर्दशः
द्विमेदादारुमञ्जिष्ठा काकोलीद्वयचन्दनैः ४८
सारिवाकुष्ठतगरजीव कर्षभसैन्धवैः
कालानुसार्याशैलेयवचा गुरुपुनर्नवैः ४९
अश्वगन्धावरीक्षीरशुक्ला यष्टीवरारसैः
शताह्वाशूर्पपर्ण्यैलात्वक्पत्रैः श्लक्ष्णकल्कितैः ५०
पक्वं मृद्वग्निना तैलं सर्ववातविकारजित्
सूतिकाबालमर्मास्थिहतक्षीणेषु पूजितम् ५१
ज्वरगुल्मग्रहोन्मादमूत्राघातान्त्र वृद्धिजित्
धन्वन्तरेरभिमतं योनिरोगक्षयापहम् ५२
बस्तिद्वारे विपन्नायाः कुक्षिः प्रस्पन्दते यदि
जन्मकाले ततः शीघ्रं पाटयित्वोद्धरेच्छिशुम् ५३
मधुकं शाकबीजं च पयस्या सुरदारु च
अश्मन्तकः कृष्णतिलास्ताम्रवल्ली शतावरी ५४
वृक्षादनी पयस्या च लता सोत्पलसारिवा
अनन्ता सारिवा रास्ना पद्मा च मधुयष्टिका ५५
बृहतीद्वयकाश्मर्यक्षीरिशुङ्गत्वचा घृतम्
पृश्निपर्णी बला शिग्रुः श्वदंष्ट्रा मधुपर्णिका ५६
शृङ्गाटकं बिसं द्राक्षा कसेरु मधुकं सिता
सप्तैतान् पयसा योगानर्द्धश्लोकसमापनान् ५७

क्रमात्सप्तसु मासेषु गर्भे स्त्रवति योजयेत्
कपित्थबिल्वबृहतीपटोलेक्षुनिदिग्धिकात् ५८
मूलैः शृतं प्रयुञ्जीत क्षीरं मासे तथाऽष्टमे
नवमे सारिवानन्तापयस्यामधुयष्टिभिः ५९
योजयेद्दशमे मासि सिद्धं क्षीरं पयस्यया
अथवा यष्टिमधुकनागरामरदारुभिः ६०
अवस्थितं लोहित मङ्गनाया
वातेन गर्भं ब्रुवतेऽनभिज्ञाः
गर्भाकृतित्वात्कटु कोष्णतीक्ष्णैः
स्रुते पुनः केवल एव रक्ते ६१
गर्भं जडा भूतहृतं वदन्ति
मूर्तेर्न दृष्टं हरणं यतस्तैः
ओजोशनत्वादथ वाऽव्यवस्थै
र्भूतैरुपेक्ष्येत न गर्भमाता ६२

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां
द्वितीये शारीरस्थाने गर्भव्यापन्नाम द्वितीयोऽध्यायः२

तृतीयोऽध्यायः

अथातोऽङ्गविभागं शारीरं व्याख्यास्यामः
इतिह स्माहुरात्रेयादयो महर्षयः
शिरोऽन्तराधिर्द्वौ बाहू सक्थिनीति समासतः
षडङ्गमङ्गं प्रत्यङ्गं तस्याक्षिहृदयादिकम् १
शब्दः स्पर्शश्च रूपं च रसो गन्धः क्रमाद्गुणाः
खानिलाग्न्यब्भुवाम् एकगुणवृद्ध्यन्वयः परे २
तत्र खात् खानि देहेऽस्मिन् श्रोत्रं शब्दो विविक्तता
वातात्स्पर्शत्वगुच्छ्वासा वह्नेर्दृग्रूपपक्तयः ३
आप्या जिह्वारसक्लेदा घ्राणगन्धास्थि पार्थिवम्
मृद्वत्र मातृजं रक्तमांसमज्जगुदादिकम् ४
पैतृकं तु स्थिरं शुक्रधमन्यस्थिकचादिकम्
चैतनं चित्तमक्षाणि नानायोनिषु जन्म च ५

सात्म्यजं त्वायुरारोग्यमनालस्यं प्रभा बलम्
रसजं वपुषो जन्म वृत्तिर्वृद्धिरलोलता ६
सात्विकं शौचमास्तिक्यं शुक्लधर्मरुचिर्मतिः
राजसं बहुभाषित्वं मानक्रुद्दम्भमत्सरम् ७
तामसं भयमज्ञानं निद्राऽलस्यं विषादिता
इति भूतमयो देहः तत्र सप्त त्वचोऽसृजः ८
पच्यमानात्प्रजायन्ते क्षीरात्सन्तानिका इव
धात्वाशयान्तरक्लेदो विपक्वः स्वंस्वमूष्मणा ९
श्लेष्मस्नाय्वपराच्छन्नः कलाख्यः काष्ठसारवत्
ताः सप्त सप्त चाधारा रक्तस्याद्यः क्रमात् परे १०
कफामपित्तपक्वानां वायोर्मूत्रस्य च स्मृताः
गर्भाशयोऽष्टमः स्त्रीणां पित्तपक्वाशयान्तरे ११
कोष्ठाङ्गानि स्थितान्येषु हृदयं क्लोम फुप्फुसम्
यकृत्प्लीहोन्दुकं वृक्कौ नाभिडिम्भान्त्रवस्तयः १२
दश जीवितधामानि शिरोरसनबन्धनम्
कण्ठोऽस्त्र हृदयं नाभिर्बस्तिः शुक्रौजसी गुदम् १३
जालानि कण्डराश्चाङ्गे पृथक् षोडश निर्दिशेत्
षट् कूर्चाः सप्त सीवन्यो मेढ्रजिह्वाशिरोगताः १४
शस्त्रेण ताः परिहरेच्चतस्रो मांसरज्जवः
चतुर्दशास्थिसङ्घाताः सीमन्ता द्विगुणा नव १५
अस्थ्नां शतानि षष्टिश्च त्रीणि दन्तनखैः सह
धन्वन्तरिस्तु त्रीण्याह सन्धीनां च शतद्वयम् १६
दशोत्तरं सहस्रे द्वे निजगादात्रिनन्दनः
स्नाव्नां नवशती पञ्च पुंसां पेशीशतानि तु १७
अधिका विंशतिः स्त्रीणां योनिस्तनसमाश्रिताः
दश मूलशिरा हृत्स्थास्ताः सर्वं सर्वतो वपुः १८
रसात्मकं वहन्त्योजस्तन्निबद्धं हि चेष्टितम्
स्थूलमूलाः सुसूक्ष्माग्राः पत्ररेखाप्रतानवत् १९
भिद्यन्ते तास्ततः सप्तशतान्यासां भवन्ति तु
तत्रैकैकं च शाखायां शतं तस्मिन्न वेधयेत् २०

सिरां जालन्धरां नाम तिस्रश्चाभ्यन्तराश्रिताः
षोडशद्विगुणाः श्रोण्यां तासां द्वे द्वे तु वङ्क्षणे २१
द्वे द्वे कटिकतरुणे शस्त्रेणाष्टौ स्पृशेन्न ताः
पार्श्वयोः षोडशैकैकामूर्ध्वगां वर्जयेत्तयोः २२
द्वादशद्विगुणाः पृष्ठे पृष्ठवंशस्य पार्श्वयोः
द्वे द्वे तत्रोर्ध्वगामिन्यौ न शस्त्रेण परामृशेत् २३
पृष्ठवज्जठरे तासां मेहनस्योपरि स्थिते
रोमराजीमुभयतो द्वे द्वे शस्त्रेण न स्पृशेत् २४
चत्वारिंशदुरस्यासां चतुर्दश न वेधयेत्
स्तनरोहिततन्मूलहृदये तु पृथग्द्वयम् २५
अपस्तम्भाख्ययोरेकां तथाऽपालापयोरपि
ग्रीवायां पृष्ठवत्तासां नीले मन्ये कृकाटिके २६
विधुरे मातृकाश्चाष्टौ षोडशेति परित्यजेत्
हन्वोः षोडश तासां द्वे सन्धिबन्धनकर्मणी २७
जिह्वायां हनुवत्तासामधो द्वे रसबोधने
द्वेच वाचःप्रवर्तिन्यौ नासायां चतुरुत्तरा २८
विंशतिर्गन्धवेदिन्यौ तासामेकां च तालुगाम्
षट्पञ्चाशन्नयनयो र्निमेषोन्मेषकर्मणी २९
द्वे द्वे अपाङ्गयोर्द्वे च तासां षडिति वर्जयेत्
नासानेत्राश्रिताः षष्टिर्ललाटे स्थपनीश्रिताम् ३०
तत्रैकां द्वे तथाऽवर्तौ चतस्रश्च कचान्तगाः
सप्तैवं वर्जयेत्तासाम् कर्णयोः षोडशात्र तु ३१
द्वे शब्दबोधने शङ्खौ सिरास्ता एव चाश्रिताः
द्वे शङ्खसन्धिगे तासाम् मूर्ध्नि द्वादश तत्र तु ३२
एकैकां पृथगुत्क्षेपसीमन्ताधिपतिस्थिताम्
इत्यवेध्यविभागार्थं प्रत्यङ्गं वर्णिताः सिराः ३३
अवेध्यास्तत्र कात्स्न्येन देहेऽष्टानवतिस्तथा
सङ्कीर्णा ग्रथिताः क्षुद्रा वक्राः सन्धिषु चाश्रिताः ३४
तासां शतानां सप्तानां पादोऽस्त्र वहते पृथक्
वातपित्तकफैर्जुष्टं शुद्धं चैवं स्थिता मलाः ३५

शरीरमनुगृह्णन्ति पीडयन्त्यन्यथा पुनः
तत्र श्यावारुणाः सूक्ष्माः पूर्णरिक्ताः क्षणात्सिराः ३६
प्रस्पन्दिन्यश्च वातास्त्रं वहन्ते पित्तशोणितम्
स्पर्शोष्णाः शीघ्रवाहिन्यो नीलपीताः कफं पुनः ३७
गौर्यः स्निग्धाः स्थिराः शीताः संसृष्टं लिङ्गसङ्करे
गूढाः समस्थिताः स्निग्धा रोहिण्यः शुद्धशोणितम् ३८
धमन्यो नाभिसम्बद्धा विंशतिश्चतुरुत्तरा
ताभिः परिवृता नाभिश्चक्रनाभिरिवारकैः ३९
ताभिश्चोर्ध्वमधस्तिर्यग्देहोऽय मनुगृह्यते
स्त्रोतांसि नासिके कर्णौ नेत्रे पाय्वास्यमेहनम् ४०
स्तनौ रक्तपथश्चेति नारीणामधिकं त्रयम्
जीवितायतनान्यन्तः स्त्रोतांस्याहुस्त्रयोदश ४१
प्राणधातुमलाम्भोन्नवाहीन्यहित सेवनात्
तानि दुष्टानि रोगाय विशुद्धानि सुखाय च ४२
स्वधातुसमवर्णानि वृत्तस्थूलान्यणूनि च
स्त्रोतांसि दीर्घाण्याकृत्या प्रतानसदृशानि च ४३
आहारश्च विहारश्च यः स्याद्दोषगुणैः समः
धातुभिर्विगुणो यश्च स्त्रोतसां स प्रदूषकः ४४
अतिप्रवृत्तिः सङ्गो वा सिराणां ग्रन्थयोऽपि वा
विमार्गतो वा गमनं स्त्रोतसां दुष्टिलक्षणम् ४५
बिसानामिव सूक्ष्माणि दूरं प्रविसृतानि च
द्वाराणि स्त्रोतसां देहे रसो यैरुपचीयते ४६
व्यधे तु स्त्रोतसां मोहकम्पाध्मानवमिज्वराः
प्रलापशूलविण्मूत्ररोधा मरणमेव वा ४७
स्त्रोतोविद्धमतो वैद्यः प्रत्याख्याय प्रसाधयेत्
उद्धृत्य शल्यं यत्नेन सद्यःक्षतविधानतः ४८
अन्नस्य पक्ता पित्तं तु पाचकाख्यं पुरेरितम्
दोषधातुमलादीनामूष्मेत्यात्रेयशासनम् ४९
तदधिष्ठानमन्नस्य ग्रहणाद्ग्रहणी मता
सैव धन्वन्तरिमते कला पित्तधराह्वया ५०

आयुरारोग्यवीर्यौजोभूत धात्वग्निपुष्टये
स्थिता पक्वाशयद्वारि भुक्तमार्गार्गलेव सा ५१
भुक्तमामाशये रुध्वा सा विपाच्य नयत्यधः
बलवत्यबला त्वन्नमाममेव विमुञ्चति ५२
ग्रहराया बलमग्निर्हि स चापि ग्रहणीबलः
दूषितेऽग्नावतो दुष्टा ग्रहणी रोगकारिणी ५३
यदन्नं देहधात्वोजोबलवर्णादिपोषणम्
तत्राग्निर्हेतुराहारान्न ह्यपक्वाद्रसादयः ५४
अन्नं कालेऽभ्यवहृतं कोष्ठं प्राणानिलाहृतम्
द्रवैर्विभिन्नसङ्घातं नीतं स्नेहेन मार्दवम् ५५
सन्धुक्षितः समानेन पचत्यामाशयस्थितम्
औदर्योऽग्निर्यथा बाह्यः स्थालीस्थं तोयतराडुलम् ५६
आदौ षड्रसमप्यन्नं मधुरीभूतमीरयेत्
फेनीभूतं कफं यातं विदाहादम्लतां ततः ५७
पित्तमामाशयात्कुर्याच्च्यवमानं च्युतं पुनः
अग्निना शोषितं पक्वं पिरिडतं कटु मारुतम् ५८
भौमाप्याग्नेयवायव्याः पञ्चोष्माणः सनाभसाः
पञ्चाहारगुणान्स्वान् स्वान् पार्थिवादीन् पचन्त्यनु ५९
यथास्वं ते च पुष्णन्ति पक्वा भूतगुणान् पृथक्
पार्थिवाः पार्थिवानेव शेषाः शेषांश्च देहगान् ६०
किट्टं सारश्च तत्पक्वमन्नं सम्भवति द्विधा
तत्राच्छं किट्टमन्नस्य मूत्रं विद्याद्धनं शकृत् ६१
सारस्तु सप्तभिर्भूयो यथास्वं पच्यतेऽग्निभिः
रसाद्रक्तं ततोमांसं मांसान्मेदस्ततोऽस्थि च ६२
अस्थ्नो मज्जा ततः शुक्रं शुक्राद्गर्भः प्रजायते
कफः पित्तं मलाः खेषु प्रस्वेदो नखरोम च ६३
स्नेहोऽक्षित्वग्विशामोजो धातूनां क्रमशो मलाः
प्रसादकिट्टौ धातूनां पाकादेवं द्विधर्छतः ६४
परस्परोपसंस्तम्भाद्धातु स्नेहपरम्परा
केचिदाहुरहोरात्रात्षडहादपरे परे ६५

मासेन याति शुक्रत्वमन्नं पाकक्रमादिभिः
सन्तता भोज्यधातूनां परिवृत्तिस्तु चक्रवत् ६६
वृष्यादीनि प्रभावेण सद्यः शुक्रादि कुर्वते
प्रायः करोत्यहोरात्रात्कर्मान्यदपि भेषजम् ६७
व्यानेन रसधातुर्हि विक्षेपोचितकर्मणा
युगत्पसर्वतोऽजस्रं देहे विक्षिप्यते सदा ६८
क्षिप्यमाणः खवैगुण्याद्रसः सज्जति यत्र सः
तस्मिन्विकारं कुरुते खे वर्षमिव तोयदः ६९
दोषाणामपि चैवं स्यादेकदेशप्रकोपणम्
अन्नभौतिकधात्वग्निकर्मेति परिभाषितम् ७०
अन्नस्य पक्ता सर्वेषां पक्तृणामधिको मतः
तन्मूलास्ते हि तद्वृद्धिक्षयवृद्धिक्षयात्मकाः ७१
तस्मात्तं विधिवद्युक्तैरन्नपानेन्धनैर्हितैः
पालयेत्प्रयतस्तस्य स्थितौ ह्यायुर्बलस्थितिः ७२
समः समाने स्थानस्थे विषमोऽग्निर्विमार्गगे
पित्ताभिमूर्च्छिते तीक्ष्णो मन्दोऽस्मिन्कफपीडिते ७३
समोऽग्निर्विषमस्तीक्ष्णो मन्दश्चैवं चतुर्विधः
यः पचेत्सम्यगेवान्नं भुक्तं सम्यक् समस्त्वसौ ७४
विषमोऽसम्यगप्याशु सम्यग्वाऽपि चिरात्पचेत्
तीक्ष्णो वह्निःपचेच्छीघ्रमसम्यगपि भोजनम् ७५
मन्दस्तु सम्यगप्यन्नमुपयुक्तं चिरात्पचेत्
कृत्वाऽस्यशोषाटोपान्त्रकूजनाध्मानगौरवम् ७६
सहजं कालजं युक्तिकृतं देहबलं त्रिधा
तत्र सत्त्वशरीरोत्थं प्राकृतं सहजं बलम् ७७
वयस्कृतमृतूत्थं च कालजं युक्तिजं पुनः
विहाराहारजनितं तथोर्जस्करयोगजम् ७८
देशोऽल्पवारिद्रुनगो जाङ्गलः स्वल्परोगदः
आनूपो विपरीतोऽस्मात्समः साधारणः स्मृतः ७९
मज्जमेदोवसामूत्रपित्तश्लेष्म शकृन्त्यसृक्
रसो जलं च देहेऽस्मिन्नेकैकाञ्जलिवर्द्धितम् ८०

पृथक् स्वप्रसृतं प्रोक्तमोजोमस्तिष्करेतसाम्
द्वावञ्जली तु स्तन्यस्य चत्वारो रजसः स्त्रियाः ८१
समधातोरिदं मानं विद्याद्वृद्धिक्षयावतः ८२
शुक्रासृग्गर्भिणीभोज्यचेष्टा गर्भाशयर्तुषु
यः स्याद्दोषोऽधिकस्तेन प्रकृतिः सप्तधोदिता ८३
विभुत्वादाशुकारित्वाद्बलित्वादन्य कोपनात्
स्वातन्त्र्याद्बहुरोगत्वाद्दोषाणां प्रबलोऽनिलः ८४
प्रायोऽत एव पवनाध्युषिता मनुष्या
दोषात्मकाः स्फुटितधूसरकेशगात्राः
शीतद्विषश्चलधृति स्मृतिबुद्धिचेष्टा
सौहार्ददृष्टि गतयोऽतिबहुप्रलापाः ८५
अल्पवित्तबल जीवितनिद्राः
सन्नसक्त चलजर्जरवाचः
नास्तिका बहुभुजः सविलासा
गीतहासमृगयाकलिलोलाः ८६
मधुराम्लपटूष्ण सात्म्यकाङ्क्षाः
कृशदीर्घाकृतयः सशब्दयाताः
न दृढा न जितेन्द्रिया न चार्या
न च कान्तादयिता बहुप्रजा वा ८७
नेत्राणि चैषां खरधूसराणि
वृत्तान्यचारूणि मृतोपमानि
उन्मीलितानीव भवन्ति सुप्ते
शैलद्रुमांस्ते गगनं च यान्ति ८८
अधन्या मत्सराध्माताः स्तेनाः प्रोद्बद्धपिण्डकाः
श्वशृगालोष्ट्रगृध्राखुकाकानूकाश्च वातिकाः ८९
पित्तं वह्निर्वह्निजं वा यदस्मा
त्पित्तोद्रिक्तस्तीक्ष्णतृष्णा बुभुक्षः
गौरोष्णाङ्ग स्ताम्र हस्ताङ्घ्रिवक्त्रः
शूरो मानी पिङ्गकेशोऽल्परोमा ९०
दयितमाल्य विलेपन मण्डनः

सुचरितः शुचिराश्रित वत्सलः
विभवसाहस बुद्धि बलान्वितो
भवति भीषु गतिर्द्विषतामपि ९१
मेधावी प्रशिथिल सन्धिंबन्धमांसो
नारीणामनभिमतोऽल्प शुक्रकामः
आवासः पलिततरङ्गनीलिकानां
भुङ्क्तेऽन्न मधुरकषायतिक्तशीतम् ९२
घर्मद्वेषी स्वेदनः पूतिगन्धि
भूर्युच्चार क्रोधपानाशनेर्ष्यः
सुप्तः पश्येत्कर्णिकारान्पलाशान्
दिग्दाहोल्काविद्युदर्कानलांश्च ९३
तनूनि पिङ्गानि चलानि चैषां
तन्वल्पपक्ष्माणि हिमप्रियाणि
क्रोधेन मद्येन रवेश्च भासा रागं
व्रजन्त्याशु विलोचनानि ९४
मध्यायुषो मध्यबलाः पण्डिताः क्लेशभीरवः
व्याघ्रर्क्षकपिमार्जारयक्षानूकाश्च पैत्तिकाः ९५
श्लेष्मा सोमः श्लेष्मलस्तेन सौम्यो
गूढस्निग्धश्लिष्ट सन्ध्यस्थिमांसः
क्षुत्तृड्दुः खक्ले शघर्मैरतप्तो
बुद्ध्या युक्तः सात्विकः सत्यसन्धः ९६
प्रियङ्गुदूर्वाशर काण्डशस्त्र
गोरोचनापद्म सुवर्णवर्णः
प्रलम्बबाहुः पृथुपीनवक्षा
महाललाटो घननीलकेशः ९७
मृद्वङ्गः समसुविभक्त चारुदेहो
बह्वोजोरतिरस शुक्रपुत्रभृत्यः
धर्मात्मा वदति न निष्ठुरं च जातु
प्रच्छन्नं वहति दृढं चिरं च वैरम् ९८
समदद्विरदेन्द्र तुल्य यातो

जलदाम्भोधि मृदङ्ग सिंहघोषः
स्मृति मानभियोगवान् विनीतो
न च बाल्येऽप्यतिरोदनो न लोलः ९९
तिक्तं कषायं कटुकोष्णरूक्ष
मल्पं स भुङ्क्ते बलवांस्तथाऽपि
रक्तान्तसुस्निग्ध विशालदीर्घ
सुव्यक्तशुक्ला सितपक्ष्मलाक्षः १००
अल्पव्याहार क्रोध पानाशनेहः
प्राज्यायुर्वित्तो दीर्घदर्शी वदान्यः
श्राद्धो गम्भीरः स्थूललक्षः क्षमावा
नार्यो निद्रालुर्दीर्घसूत्रः कृतज्ञः १०१
ऋजुर्विपश्चित्सुभगः सुलज्जो
भक्तो गुरूणां स्थिरसौहृदश्च
स्वप्ने सपद्मान्सविहङ्ग मालां
स्तोयाशयान् पश्यति तोयदांश्च १०२
ब्रह्मरुद्रेन्द्रवरुणतार्क्ष्य हंसगजाधिपैः
श्लेष्मप्रकृतयस्तुल्यास्तथा सिंहाश्वगोवृषैः १०३
प्रकृतीर्द्वयसर्वोत्था द्वन्द्वसर्वगुणोदये
शौचास्तिक्यादिभिश्चैवं गुणैर्गुणमयीर्वदेत् १०४
वयस्त्वाषोडशाद्बालं तत्र धात्विन्द्रियौजसाम्
वृद्धिरासप्ततेर्मध्यं तत्रावृद्धिः परं क्षयः १०५
स्वं स्वं हस्तत्रयं सार्द्धं वपुः पात्रं सुखायुषोः
न च यद्युक्तमुद्रिक्तैरष्टाभिर्निन्दितैर्निजैः १०६
अरोमशासितस्थूलदीर्घत्वैः सविपर्ययैः
सुस्निग्धा मृदवः सूक्ष्मा नैकमूलाः स्थिराः कचाः १०७
ललाटमुन्नतं श्लिष्टशङ्खमर्धेन्दु सन्निभम्
कर्णौ नीचोन्नतौ पश्चान्महान्तौ श्लिष्टमांसलौ १०८
नेत्रे व्यक्तासितसिते सुबद्धघनपक्ष्मणी
उन्नताग्रा महोच्छ्वासा पीनर्जुर्नासिका समा १०९
ओष्ठौ रक्तावनुद्वृत्तौ महत्त्यौ नोल्बणे हनू

महदास्यं घना दन्ताः स्निग्धाः श्लद्दणाः सिताःसमाः ११०
जिह्वा रक्ताऽयता तन्वी मांसलं चिबुकं महत्
ग्रीवा ह्रस्वा घना वृत्ता स्कन्धावुन्नतपीवरौ १११
उदरं दच्चिणावर्तगूढनाभि समुन्नतम्
तनुरक्तोन्नतनखं स्निग्धमाताम्रमांसलम् ११२
दीर्घाच्छिद्राङ्गुलि महत्पाणिपादं प्रतिष्ठितम्
गूढवंशं बृहत्पृष्ठं निगूढाः सन्धयो दृढाः ११३
धीरः स्वरोऽनुनादी च वर्णः स्निग्धः स्थिरप्रभः
स्वभावजं स्थिरं सत्त्वमविकारि विपत्स्वपि ११४
उत्तरोत्तरसुत्तेत्रं वपुर्गर्भादि नीरुजम्
आयामज्ञानविज्ञानैर्वर्द्धमानं शनैः शुभम् ११५
इति सर्वगुणोपेते शरीरे शरदां शतम्
आयुरैश्वर्यमिष्टाश्च सर्वे भावाः प्रतिष्ठिताः ११६
त्वग्रक्तादीनि सत्त्वान्तान्यग्र्याण्यष्टौ यथोत्तरम्
बलप्रमाणज्ञानार्थं साराण्युक्तानि देहिनाम् ११७
सारैरुपेतः सर्वैः स्यात्परं गौरवसंयुतः
सर्वारम्भेषु चाशावान्सहिष्णुः सन्मतिः स्थिरः ११८
अनुत्सेकमदैन्यं च सुखं दुःखं च सेवते
सत्ववांस्तप्यमानस्तु राजसो नैव तामसः ११९
दानशीलदयासत्य ब्रह्मचर्यकृतज्ञताः
रसायनानि मैत्री च पुण्यायुर्वृद्धिकृद्गणः १२०
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदय संहितायां
द्वितीये शारीरस्थानेऽङ्गविभागो नाम तृतीयोऽध्यायः ३

चतुर्थोऽध्यायः

अथातो मर्मविभागं शारीरं व्याख्यास्यामः
इति ह स्माहुरात्रेयादयो महर्षयः
सप्तोत्तरं मर्मशतं तेषामेकादशादिशेत्
पृथक्सक्थ्नोस्तथा बाह्वोस्त्रीणि कोष्ठे नवोरसि १
पृष्ठे चतुर्दशोर्ध्वं तु जत्रोस्त्रिंशच्च सप्त च

मध्ये पादतलस्याहुरभितो मध्यमाङ्गुलिम् २
तलहृन्नाम रुजया तत्र विद्धस्य पञ्चता
अङ्गुष्ठाङ्गुलिमध्यस्थं क्षिप्रमाक्षेपमारणम् ३
तस्योर्ध्वं द्व्यङ्गुले कूर्चः पादभ्रमणकम्पकृत्
गुल्फसन्धेरधः कूर्चशिरः शोफरुजाकरम् ४
जङ्घाचरणयोः सन्धौ गुल्फो रुक्स्तम्भमान्द्यकृत्
जङ्घान्तरे त्विन्द्रबस्तिर्मारयत्यसृजः क्षयात् ५
जङ्घोर्वोः सङ्गमे जानु खञ्जता तत्र जीवतः
जानुनस्र्यङ्गुलादूर्ध्वमाण्यूरुस्तम्भशोफकृत् ६
उर्व्यूरुमध्ये तद्वेधात्सक्थिशोषोऽस्रसङ्क्षयात्
ऊरुमूले लोहिताक्षं हन्ति पक्षमसृक्क्षयात् ७
मुष्कवङ्क्षणयोर्मध्ये विटपं षण्ढताकरम्
इति सक्थ्नोस्तथा बाह्वोर्मणिबन्धोऽत्र गुल्फवत् ८
कूर्परं जानुवत्कौण्यं तयोर्विटपवत्पुनः
कक्षाक्षमध्ये कक्षाधृक् कुणित्वं तत्र जायते ९
स्थूलान्त्रबद्धः सद्योघ्नो विड्वातवमनो गुदः
मूत्राशयो धनुर्वक्रो बस्तिरल्पास्रमांसगः १०
एकाधोवदनो मध्ये कट्याः सद्यो निहन्त्यसून्
ऋतेऽश्मरीव्रणाद्विद्धस्तत्राप्युभयतश्च सः ११
मूत्रस्राव्येकतो भिन्ने व्रणो रोहेच्च यत्नतः
देहामपक्वस्थानानां मध्ये सर्वसिराश्रयः १२
नाभिः सोऽपि हि सद्यघ्नो द्वारमामाशयस्य च
सत्वादिधाम हृदयं स्तनोरःकोष्ठमध्यगम् १३
स्तनरोहितमूलाख्ये द्व्यङ्गुले स्तनयोर्वदेत्
ऊर्ध्वाधोऽस्रकफापूर्णकोष्ठो नश्येत्तयोः क्रमात् १४
अपस्तम्भावुरःपार्श्वे नाड्यावनिलवाहिनी
रक्तेन पूर्णकोष्ठोऽत्र श्वासात्कासाच्च नश्यति १५
पृष्ठवंशोरसोर्मध्ये तयोरेव च पार्श्वयोः
अधोंऽसकूटयोर्विद्यादपालापाख्यमर्मणी १६
तयोः कोष्ठेऽसृजा पूर्णे नश्येद्यातेन पूयताम्

पार्श्वयोः पृष्ठवंशस्य श्रोणीकर्णौ प्रति स्थिते १७
वंशाश्रिते स्फिजोरूर्ध्वं कटीकतरुणे स्मृते
तत्र रक्तक्षयात्पाण्डुर्हीनरूपो विनश्यति १८
पृष्ठवंशं ह्युभयतो यौ सन्धी कटिपार्श्वयोः
जघनस्य बहिर्भागे मर्मणी तौ कुकुन्दरौ १९
चेष्टाहानिरधःकाये स्पर्शाज्ञानं च तद्व्यधात्
पार्श्वान्तरनिबद्धौ यावुपरि श्रोणिकर्णयोः २०
आशयच्छादनौ तौ तु नितम्बौ तरुणास्थिगौ
अधःशरीरे शोफोऽत्र दौर्बल्यं मरणं ततः २१
पार्श्वान्तरनिबद्धौ च मध्ये जघनपार्श्वयोः
तिर्यगूर्ध्वं च निर्दिष्टौ पार्श्वसन्धी तयोर्व्यधात् २२
रक्तपूरितकोष्ठस्य शरीरान्तरसम्भवः
स्तनमूलार्जवे भागे पृष्ठवंशाश्रये सिरे २३
बृहत्यौ तत्र विद्धस्य मरणं रक्तसङ्क्षयात्
बाहुमूलाभिसम्बद्धे पृष्ठवंशस्य पार्श्वयोः २४
अंसयोः फलके बाहुस्वापशोषौ तयोर्व्यधात्
ग्रीवामुभयतः स्नाव्नी ग्रीवाबाहुशिरोन्तरे २५
स्कन्धांसपीठसम्बन्धावंसौ बाहुक्रियाहरौ
कण्ठनाडीमुभयतः सिरा हनुसमाश्रिताः २६
चतस्रस्तासु नीले द्वे मन्ये द्वे मर्मणी स्मृते
स्वरप्रणाशवैकृत्यं रसाज्ञानं च तद्व्यधे २७
कण्ठनाडीमुभयतो जिह्वानासागताः सिराः
पृथक् चतस्रस्ताः सद्यो घ्नन्त्यसून्मातृकाह्वयाः २८
कृकाटिके शिरोग्रीवासन्धौ तत्र चलं शिरः
अधस्तात्कर्णयोर्निम्ने विधुरे श्रुतिहारिणी २९
फणावुभयतो घ्राणमार्गं श्रोत्रपथानुगौ
अन्तर्गलस्थितौ वेधाद्गन्धविज्ञानहारिणौ ३०
नेत्रयोर्बाह्यतोऽपाङ्गौ भ्रुवोः पुच्छान्तयोरधः
तथोपरि भुवोर्निम्नावावर्तावान्ध्यमेषु तु ३१
अनुकर्णं ललाटान्ते शङ्खौ सद्योविनाशनौ

केशान्ते शङ्खयोरूर्ध्वमुत्क्षेपौ स्थपनी पुनः ३२
भ्रुवोर्मध्ये त्रयेऽप्यत्र शल्ये जीवेदनुद्धृते
स्वयं वा पतिते पाकात्सद्यो नश्यति तूद्धृते ३३
जिह्वाक्षिनासिका श्रोत्रखचतुष्टयसङ्गमे
तालुन्यास्यानि चत्वारि स्रोतसां तेषु मर्मसु ३४
विद्धः शृङ्गाटकाख्येषु सद्यस्त्यजति जीवितम्
कपाले सन्धयः पञ्च सीमन्तास्तिर्यगूर्ध्वगाः ३५
भ्रमोन्मादमनोनाशैस्तेषु विद्धेषु नश्यति
आन्तरो मस्तकस्योर्ध्वं सिरासन्धिसमागमः ३६
रोमावर्तोऽधिपो नाम मर्म सद्यो हरत्यसून्
विषमं स्पन्दनं यत्र पीडिते रुक् च मर्म तत् ३७
मांसास्थिस्नायुधमनीसिरा सन्धिसमागमः
स्यान्मर्मेति च तेनात्र सुतरां जीवितं स्थितम् ३८
बाहुल्येन तु निर्देशः षोढैवं मर्मकल्पना
प्राणायतनसामान्यादैक्यं वा मर्मणां मतम् ३९
मांसजानि दशेन्द्राख्यतलहृत्स्तनरोहिताः
शङ्खौ कटीकतरुणे नितम्बावंसयोः फले ४०
अस्थ्न्यष्टौ स्नावमर्माणि त्रयोविंशतिराणयः
कूर्चकूर्चशिरोऽपाङ्ग क्षिप्रोत्क्षेपांसबस्तयः ४१
गुदापस्तम्भविधुरशृङ्गाटानि नवादिशेत्
मर्माणि धमनीस्थानि सप्तत्रिंशत्सिराश्रयाः ४२
बृहत्यौ मातृका नीले मन्ये कक्षाधरौ फणौ
विटपे हृदयं नाभिः पार्श्वसन्धी स्तनाधरे ४३
अपालापौ स्थपन्युर्व्यश्चतस्रो लोहितानि च
सन्धौ विंशतिरावर्तौ मणिबन्धौ कुकुन्दरौ ४४
सीमन्ताः कूर्परौ गुल्फौ कृकाटयौ जानुनी पतिः
मांसमर्म गुदोऽन्येषां स्नाव्नि कक्षाधरौ तथा ४५
विटपौ विधुराख्ये च शृङ्गाटानि सिरासु तु
अपस्तम्भावपाङ्गौ च धमनीस्थं न तैः स्मृतम् ४६
विद्धेऽजस्रमसृक्स्रावो मांसधावनवत्तनुः

पाण्डुत्वमिन्द्रियाज्ञानं मरणं चाशु मांसजे ४७
मज्जान्वितोऽच्छो विच्छिन्नः स्रावो रुक् चास्थिमर्मणि
आयामाक्षेपकस्तम्भाः स्नावजेऽभ्यधिकं रुजा ४८
यानस्थानासनाशक्ति र्वैकल्यमथवाऽन्तकः
रक्तं सशब्दफेनोष्णं धमनीस्थे विचेतसः ४९
सिरामर्मव्यधे सान्द्रमजस्रं बह्वसृक्स्रवेत्
तत्क्षयात्तृड्भ्रमश्वासमोहहिध्माभिरन्तकः ५०
वस्तु शूकैरिवाकीर्णं रूढे च कुणिखञ्जता
बलचेष्टाक्षयः शोषः पर्वशोफश्च सन्धिजे ५१
नाभिशङ्खाधिपापानहृच्छृङ्गाटकबस्तयः
अष्टौ च मातृकाः सद्यो निघ्नन्त्येकान्नविंशतिः ५२
सप्ताहः परमस्तेषां कालः कालस्य कर्षणे
त्रयस्त्रिंशदपस्तम्भतल हृत्पार्श्वसन्धयः ५३
कटीतरुणसीमन्तस्तन मूलेन्द्रबस्तयः
क्षिप्रापालापबृहती नितम्बस्तनरोहिताः ५४
कालान्तरप्राणहरा मासमासार्द्धजीविताः
उत्क्षेपौ स्थपनी त्रीणि विशल्यघ्नानि तत्रहि ५५
वायुर्मांसवसामज्जमस्तुलुङ्गानि शोषयन्
शल्यापाये विनिर्गच्छन् श्वासात्कासाच्च हन्त्यसून् ५६
फणावपाङ्गौ विधुरे नीले मन्ये कृकाटिके
असांसफलकावर्त विटपोर्वीकुकुन्दराः ५७
सजानुलोहिताक्षाणिकक्षा धृक्कूर्चकूर्पराः
वैकल्यमिति चत्वारि चत्वारिंशच्च कुर्वते ५८
हरन्ति तान्यपि प्राणान् कदाचिदभिघाततः
अष्टौ कूर्चशिरोगुल्फमणिबन्धा रुजाकराः ५९
तेषां विटपकक्षाधृगुर्व्यः कूर्चशिरांसि च
द्वादशाङ्गुलमानानि द्व्यङ्गुले मणिबन्धने ६०
गुल्फौ च स्तनमूले च त्र्यङ्गुलं जानुकूर्परम्
अपानबस्तिहृन्नाभिनीलाः सीमन्तमातृकाः ६१
कूर्चशृङ्गाटमन्याश्च त्रिंशदेकेन वर्जिताः

आत्मपाणितलोन्मानाः शेषाण्यर्द्धाङ्गुलं वदेत् ६२
पञ्चाशत्षट् च मर्माणि तिलव्रीहिसमान्यपि
इष्टानि मर्माण्यन्येषां चतुर्द्धोक्ताः सिरास्तु याः ६३
तर्पयन्ति वपुः कृत्स्नं ता मर्माण्याश्रितास्ततः
तत्क्षतात्क्षतजात्यर्थ प्रवृत्तेर्धातुसङ्क्षये ६४
वृद्धश्चलो रुजस्तीव्राः प्रतनोति समीरयन्
तेजस्तदुद्धृतं धत्ते तृष्णाशोषमदभ्रमान् ६५
स्विन्नस्त्रस्तश्लथतनुं हरत्येनं ततोऽन्तकः
वर्द्धयेत्सन्धितो गात्रं मर्मण्यभिहते द्रुतम् ६६
छेदनात्सन्धिदेशस्य सङ्कुचन्ति सिरा ह्यतः
जीवितं प्राणिनां तत्र रक्ते तिष्ठति तिष्ठति ६७
सुविक्षतोऽप्यतो जीवेदमर्मणि न मर्मणि
प्राणघातिनि जीवेत्तु कश्चिद्वैद्यगुणेन चेत् ६८
असमग्राभिघाताच्च सोऽपि वैकल्यमश्नुते
तस्मात्क्षारविषाग्न्यादीन् यत्नान्मर्मसु वर्जयेत् ६९
मर्माभिघातः स्वल्पोऽपि प्रायशो बाधतेतराम्
रोगा मर्माश्रयास्तद्वत्प्रक्रान्ता यत्नतोऽपि च ७०
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां
द्वितीये शारीरस्थाने मर्मविभागो नाम चतुर्थोऽध्यायः ४

पञ्चमोऽध्यायः

अथातो विकृतिविज्ञानीयं शारीरं व्याख्यास्यामः
इति ह स्माहुरात्रेयादयो महर्षयः
पुष्पं फलस्य धूमोऽग्नेर्वर्षस्य जलदोदयः
यथा भविष्यतो लिङ्गं रिष्टं मृत्योस्तथा ध्रुवम् १
अायुष्मति क्रियाः सर्वाः सफलाः सम्प्रयोजिताः
भवन्ति भिषजां भूत्यै कृतज्ञ इव भूभुजि १
क्षीणायुषि कृतं कर्म व्यर्थं कृतमिवाधमे
अयशो देहसन्देहं स्वार्थहानिं च यच्छति २
तर्हीदानीं गतासूनां लक्षणं सम्प्रचक्षते

विकृतिः प्रकृतेः प्राज्ञैः प्रदिष्टा रिष्टसंज्ञया ३
अरिष्टं नास्ति मरणं दृष्टरिष्टं च जीवितम्
अरिष्टे रिष्टविज्ञानं न च रिष्टेऽप्यनैपुणात् २
केचित्तु तदिद्वधेत्याहुः स्थाय्यस्थायिविभेदतः
दोषाणामपि बाहुल्याद्रिष्टाभासः समुद्भवेत् ३
स दोषाणां शमे शाम्येत्स्थाय्यवश्यं तु मृत्यवे
रूपेन्द्रियस्वरच्छायाप्रतिच्छायाक्रियादिषु ४
अन्येष्वपि च भावेषु प्राकृतेष्वनिमित्ततः
विकृतिर्या समासेन रिष्टं तदिति लक्षयेत् ५
केशरोम निरभ्यङ्गं यस्याभ्यक्तमिवेक्ष्यते
यस्यात्यर्थं चले नेत्रे स्तब्धान्तर्गतनिर्गते ६
जिह्मे विस्तृतसङ्क्षिप्ते सङ्क्षिप्तविनतभ्रुणी
उद्भ्रान्तदर्शने हीनदर्शने नकुलोपमे ७
कपोताभे अलाताभे स्रुते लुलितपक्ष्मणी
नासिकाऽत्यर्थविवृता संवृता पिटिकाचिता ८
उच्छूना स्फुटिता म्लाना यस्यौष्ठो यात्यधोऽधरः
ऊर्ध्वं द्वितीयः स्यातां वा पक्वजम्बूनिभावुभौ ९
दन्ताः सशर्कराः श्यावास्ताम्राः पुष्पितपङ्किताः
सहसैव पतेयुर्वा जिह्वा जिह्मा विसर्पिणी १०
शूना शुष्का गुरुः श्यावा लिप्ता सुप्ता सकण्टका
शिरः शिरोधरा वोढुं पृष्ठं वा भारमात्मनः ११
हनू वा पिण्डमास्यस्थं शक्नुवन्ति न यस्य च
यस्यानिमित्तमङ्गानि गुरूण्यति लघूनि वा १२
विषदोषाद्विना यस्य खेभ्यो रक्तं प्रवर्तते
उत्सिक्तं मेहनं यस्य वृषणावतिनिःसृतौ १३
अतोऽन्यथा वा यस्य स्यात् सर्वे ते कालचोदिताः
यस्यापूर्वाः सिरालेखा बालेन्द्वाकृतयोऽपि वा १४
ललाटे बस्तिशीर्षे वा षण्मासान्न स जीवति
पद्मिनीपत्रवत्तोयं शरीरे यस्य देहिनः १५
प्लवते प्लवमानस्य षण्मासास्तस्य जीवितम्

हरिताभाः सिरा यस्य रोमकूपाश्च संवृताः १६
सोऽम्लाभिलाषी पुरुषः पित्तान्मरणमश्नुते
यस्य गोमयचूर्णाभं चूर्णं मुर्ध्नि मुखेऽपि वा १७
सस्नेहं मूर्ध्नि धूमो वा मासान्तं तस्य जीवितम्
मूर्ध्नि भ्रुवोर्वा कुर्वन्ति सीमन्तावर्तका नवाः १८
मृत्युं स्वस्थस्य षड्रात्रात्त्रिरात्रादातुरस्य तु
जिह्वा श्यावा मुखं पूति सव्यमक्षि निमज्जति १९
खगा वा मूर्ध्नि लीयन्ते यस्य तं परिवर्जयेत्
यस्य स्नातानुलिप्तस्य पूर्वं शुष्यत्युरो भृशम् २०
आर्द्रेषु सर्वगात्रेषु सोऽधमासं न जीवति
अकस्माद्युगपद्गात्रे वर्णौ प्राकृतवैकृतौ २१
तथैवोपचयग्लानिरौक्ष्यस्नेहादि मृत्यवे
यस्य स्फुटेयुरङ्गुल्यो नाकृष्टा न स जीवति २२
क्षवकासादिषु तथा यस्यापूर्वो ध्वनिर्भवेत्
ह्रस्वो दीर्घोऽति वोच्छ्वासः पूतिः सुरभिरेव वा २३
आप्लुतानाप्लुते काये यस्य गन्धोऽतिमानुषः
मलवस्त्रव्रणादौ वा वर्षान्तं तस्य जीवितम् २४
भजन्तेऽत्यङ्गसौरस्याद्यं यूकामक्षिकादयः
त्यजन्ति वाऽतिवैरस्यात्सोऽपि वर्षं न जीवति २५
सततोष्मसु गात्रेषु शैत्यं यस्योपलक्ष्यते
शीतेषु भृशमौष्ण्यं वा स्वेदः स्तम्भोऽप्यहेतुकः २६
यो जातशीतपिटिकः शीताङ्गो वा विदह्यते
उष्णद्वेषी च शीतार्तः स प्रेताधिपगोचरः २७
उरस्यूष्मा भवेद्यस्य जठरे चातिशीतता
भिन्नं पुरीषं तृष्णा च यथा प्रेतस्तथैव सः २८
मूत्रं पुरीषं निष्ठ्यूतं शुक्रं वाऽप्सु निमज्जति
निष्ठ्यूतं बहुवर्णं वा यस्य मासात्स नश्यति २९
घनीभूतमिवाकाशमाकाशमिव यो घनम्
अमूर्तमिव मूर्तं च मूर्तं चामूर्तवत्स्थितम् ३०
तेजस्व्यतेजस्तद्वच्च शुक्लं कृष्णमसच्च सत्

अनेत्ररोगश्चन्द्रं च बहुरूपमलाञ्छनम् ३१
जाग्रद्रक्षांसि गन्धर्वान् प्रेतानन्यांश्च तद्विधान्
रूपं व्याकृति तत्तच्च यः पश्यति स नश्यति ३२
सप्तर्षीणां समीपस्थां यो न पश्यत्यरुन्धतीम्
ध्रुवमाकाशगङ्गां वा स न पश्यति तां समाम् ३३
मेघतोयौघ निर्घोषवीणापणव वेणुजान्
शृणोत्यन्यांश्च यः शब्दानसतो न सतोऽपि वा ३४
निष्पीड्य कर्णौ शृणुयान्न यो धुकधुकास्वनम्
तद्वद्गन्धरसस्पर्शान् मन्यते यो विपर्ययात् ३५
सर्वशो वा न यो यश्च दीपगन्धं न जिघ्रति
विधिना यस्य दोषाय स्वास्थ्यायाविधिना रसाः ३६
यः पांसुनेव कीर्णाङ्गो योऽङ्गे घातं न वेत्ति वा
अन्तरेण तपस्तीव्रं योगं वा विधिपूर्वकम् ३७
जानात्यतीन्द्रियं यश्च तेषां मरणमादिशेत्
हीनो दीनः स्वरोऽव्यक्तो यस्य स्याद्गद्गदोऽपि वा ३८
सहसा यो विमुह्येद्वा विवक्षुर्न स जीवति
स्वरस्य दुर्बलीभावं हानिं च बलवर्णयोः ३९
रोगवृद्धिमयुक्त्या च दृष्ट्वा मरणमादिशेत्
अपस्वरं भाषमाणं प्राप्तं मरणमात्मनः ४०
श्रोतारं चास्य शब्दस्य दूरतः परिवर्जयेत्
संस्थानेन प्रमाणेन वर्णेन प्रभयाऽपि वा ४१
छाया विवर्तते यस्य स्वप्नेऽपि प्रेत एव सः
आतपादर्शतोयादौ या संस्थानप्रमाणतः ४२
छायाऽङ्गात्सम्भवत्युक्ता प्रतिच्छायेति सा पुनः
वर्णप्रभाश्रया या तु सा छायैव शरीरगा ४३
भवेद्यस्य प्रतिच्छाया छिन्ना भिन्नाऽधिकाऽकुला
विशिरा द्विशिरा जिह्मा विकृता यदि वाऽन्यथा ४४
तं समाप्तायुषं विद्यान्न चेल्लक्ष्यनिमित्तजा
प्रतिच्छायामयी यस्य न चाक्ष्णीक्ष्येत कन्यका ४५
खादीनां पञ्च पञ्चानां छाया विविधलक्षणाः

नाभसी निर्मलाऽनीला सस्नेहा सप्रभेव च ४६
वाताद्रजोऽरुणा श्यावा भस्मरूक्षा हतप्रभा
विशुद्धरक्ता त्वाग्नेयी दीप्ताभा दर्शनप्रिया ४७
शुद्धवैदूर्यविमला सुस्निग्धा तोयजा सुखा
स्थिरा स्निग्धा घना शुद्धा श्यामा श्वेता च पार्थिवी ४८
वायवी रोगमरणक्लेशायान्याः सुखोदयाः
प्रभोक्ता तैजसी सर्वा सा तु सप्तविधा स्मृता ४९
रक्ता पीता सिता श्यावा हरिता पाण्डुराऽसिता
तासां याः स्युर्विकासिन्यः स्निग्धाश्च विमलाश्च याः ५०
ताः शुभा मलिना रूक्षाः सङ्क्षिप्ताश्चाशुभोदयाः
वर्णमाक्रामति छाया प्रभा वर्णप्रकाशिनी ५१
आसन्ने लक्ष्यते छाया विकृष्टे भा प्रकाशते
नाच्छायो नाप्रभः कश्चिद्विशेषाश्चिह्नयन्ति तु ५२
नृणां शुभाशुभोत्पत्तिं काले छायासमाश्रयाः
निकषन्निव यः पादौ च्युतांसः परिसर्पति ५३
हीयते बलतः शश्वद्योऽन्नमश्नन् हितं बहु
योऽल्पाशी बहुविण्मूत्रो बह्वाशी चाल्पमूत्रविट् ५४
यो वाऽल्पाशी कफेनार्तो दीर्घं श्वसिति चेष्टते
दीर्घमुच्छ्वस्य यो ह्रस्वं निःश्वस्य परिताम्यति ५५
ह्रस्वं च यः प्रश्वसिति व्याविद्धं स्पन्दते भृशम्
शिरो विक्षिपते कृच्छ्राद्योऽञ्चयित्वा प्रपाणिकौ ५६
यो ललाटात्स्रुतस्वेदः श्लथसन्धानबन्धनः
उत्थाप्यमानः सम्मुह्येद्यो बली दुर्बलोऽपि वा ५७
उत्तान एव स्वपिति यः पादौ विकरोति च
शयनासनकुड्यादेर्योऽसदेव जिघृक्षति ५८
अहास्यहासी सम्मुह्यन् यो लेढि दशनच्छदौ
उत्तरौष्ठं परिलिहन् फूत्कारांश्च करोति यः ५९
यमभिद्रवति च्छाया कृष्णा पीताऽरुणाऽपि वा
भिषग्भेषजपानान्नगुरुमित्रद्विषश्च ये ६०
वशगाः सर्व एवैते विज्ञेयाः समवर्तिनः

ग्रीवाललाटहृदयं यस्य स्विद्यति शीतलम् ६१
उष्णोऽपरः प्रदेशश्च शरणं तस्य देवताः
पूर्वरूपाणि सर्वाणि ज्वरादिष्वतिमात्रया
यं विशंति विशत्येनं मृत्युर्ज्वरपुरःसरः १ि
योऽणुज्योतिरनेकाग्रो दुःच्छायो दुर्मनाः सदा ६२
बलि बलिभृतो यस्य प्रणीतं नोपभुञ्जते
निर्निमित्तं च यो मेधां शोभामुपचयं श्रियम् ६३
प्राप्नोत्यतो वा विभ्रंशं स प्राप्नोति यमक्षयम्
गुणदोषमयी यस्य स्वस्थस्य व्याधितस्य वा ६४
यात्यन्यथात्वं प्रकृतिः षण्मासान्न स जीवति
भक्तिः शीलं स्मृतिस्त्यागो बुद्धिर्बलमहेतुकम् ६५
षडेतानि निवर्तन्ते षड्भिर्मासैर्मरिष्यतः
मत्तवद्गतिवाक्कम्पमोहा मासान्मरिष्यतः ६६
नश्यत्यजानन् षडहात्केशलुञ्चनवेदनाम्
न याति यस्य चाहारः कण्ठं कण्ठामयादृते ६७
प्रेष्याः प्रतीपतां यान्ति प्रेताकृतिरुदीर्यते
यस्य निद्रा भवेन्नित्या नैव वा न स जीवति ६८
वक्त्रमापूर्यतेऽश्रूणां स्विद्यतश्चरणौ भृशम्
चक्षुश्चाकुलतां याति यमराज्यं गमिष्यतः ६९
यैः पुरा रमते भावैररतिस्तैर्न जीवति
सहसा जायते यस्य विकारः सर्वलक्षणः ७०
निवर्तते वा सहसासहसा स विनश्यति
ज्वरो निहन्ति बलवान् गम्भीरो दैर्घरात्रिकः ७१
सप्रलापभ्रमश्वासः क्षीणं शूनं हतानलम्
अक्षामं सक्तवचनं रक्ताक्षं हृदि शूलिनम् ७२
सशुष्ककासः पूर्वाह्णे योऽपराह्णेऽपि वा भवेत्
बलमांसविहीनस्य श्लेष्मकाससमन्वितः ७३
रक्तपित्तं भृशं रक्तं कृष्णमिन्द्रधनुष्प्रभम्
ताम्रहारिद्रहरितं रूपं रक्तं प्रदर्शयेत् ७४
रोमकूपप्रविसृतं कण्ठास्यहृदये सजत्

वाससोऽरञ्जनं पूति वेगवच्चाति भूरि च ७५
वृद्धं पाण्डुज्वरच्छर्दिकासशोफातिसारिणम्
कासश्वासौ ज्वरच्छर्दितृष्णातीसारशोफिनम् ७६
यक्ष्मा पार्श्वरुजानाहरक्तच्छर्द्यंसतापिनम्
छर्दिर्वेगवती मूत्रशकृद्गन्धिः सचन्द्रिका ७७
सास्रविट्पूयरुक्कास श्वासवत्यनुषङ्गिणी
तृष्णाऽन्यरोगक्षपितं बहिर्जिह्वं विचेतनम् ७८
मदात्ययोऽतिशीतार्तं क्षीणं तैलप्रभाननम्
अर्शांसि पाणिपन्नाभिगुदमुष्कास्यशोफिनम् ७९
हृत्पार्श्वाङ्गरुजाछर्दिपायु पाकज्वरातुरम्
अतीसारो यकृत्पिण्डमांसधावनमेचकैः ८०
तुल्यस्तैलघृतक्षीर दधिमज्जवसासवैः
मस्तुलुङ्गमषी पूयवेसवाराम्बुमाक्षिकैः ८१
अतिरक्तासितस्निग्ध पूत्यच्छघनवेदनः
कर्बुरः प्रस्रवन् धातून् निष्पुरीषोऽथवाऽतिविट् ८२
तन्तुमान् मक्षिकाक्रान्तो राजीमांश्चन्द्रकैर्युतः
शीर्णपायुवलि मुक्तनालं पर्वास्थिशूलिनम् ८३
स्रस्तपायुं बलक्षीणमन्नमेवोपवेशयन्
सतृट्श्वासज्वरच्छर्दिदाहानाहप्रवाहिकः ८४
अश्मरी शूनवृषणं बद्धमूत्रं रुजार्दितम्
मेहस्तृड्दाहपिटिकामांसकोथातिसारिणम् ८५
पिटिका मर्महृत्पृष्ठस्तनांसगुदमूर्द्धगाः
पर्वपादकरस्था वा मन्दोत्साहं प्रमेहिणम् ८६
सर्वं च मांससङ्कोथदाहतृष्णामदज्वरैः
विसर्पमर्मसंरोधहिध्माश्वासभ्रमक्लमैः ८७
गुल्मः पृथुपरीणाहो घनः कूर्म इवोन्नतः
सिरानद्धो ज्वरच्छर्दिहिध्माध्मानरुजान्वितः ८८
कासपीनसहृल्लास श्वासातीसारशोफवान्
विण्मूत्रसङ्ग्रहश्वास शोफहिध्माज्वरभ्रमैः ८९
मूर्च्छाच्छर्द्यतिसारैश्च जठरं हन्ति दुर्बलम्

शूनाक्षं कुटिलोपस्थमुपक्लिन्नतनुत्वचम् ९०
विरेचनहतानाहमानह्यन्तं पुनः पुनः
पाण्डुरोगः श्वयथुमान् पीताक्षिनखदर्शनम् ९१
तन्द्रादाहारुचिच्छर्दिमूर्च्छाध्मा नातिसारवान्
अनेकोपद्रवयुतः पादाभ्यां प्रसृतो नरम् ९२
नारीं शोफो मुखाद्धन्ति कुक्षिगुह्यादुभावपि
राजीचितः स्रवंश्छर्दिज्वरश्वासातिसारिणम् ९३
ज्वरातिसारौ शोफान्ते श्वयथुर्वा तयोः क्षये
दुर्बलस्य विशेषेण जायन्तेऽन्ताय देहिनः ९४
श्वयथुर्यस्य पादस्थः परिस्रस्ते च पिण्डिके
सीदतः सक्थिनी चैव तं भिषक् परिवर्जयेत् ९५
आननं हस्तपादं च विशेषाद्यस्य शुष्यतः
शूयेते वा विना देहात्स मासाद्याति पञ्चताम् ९६
विसर्पः कासवैवर्ण्यज्वरमूर्च्छाङ्गभङ्गवान्
भ्रमास्यशोफहृल्लासदेहसादातिसारवान् ९७
कुष्ठं विशीर्यमाणाङ्गं रक्तनेत्रं हतस्वरम्
मन्दाग्निं जन्तुभिर्जुष्टं हन्ति तृष्णातिसारिणम् ९८
वायुः सुप्तत्वचं भुग्नं कम्पशोफरुजातुरम्
वातास्रं मोहमूर्च्छायमदास्वप्नज्वरान्वितम् ९९
शिरोग्रहारुचिश्वास सङ्कोचस्फोटकोथवत्
शिरोरोगा रुचिश्वासमोहविड्भेदतृड्भ्रमैः १००
घ्नन्ति सर्वामयाः क्षीणस्वरधातुबलानलम्
वातव्याधिरपस्मारी कुष्ठी रक्त्युदरी क्षयी १०१
गुल्मी मेही च तान् क्षीणान् विकारेऽल्पेऽपि वर्जयेत्
बलमांसक्षयस्तीव्रो रोगवृद्धिररोचकः १०२
यस्यातुरस्य लक्ष्यन्ते त्रीन् पक्षान्न स जीवति
वाताष्ठीलाऽतिसंवृद्धा तिष्ठन्ती दारुणा हृदि १०३
तृष्णया नु परीतस्य सद्यो मुष्णाति जीवितम्
शैथिल्यं पिण्डिके वायुर्नीत्वा नासां च जिह्मताम् १०४
क्षीणस्यायम्य मन्ये वा सद्यो मुष्णाति जीवितम्

नाभीगुदान्तरं गत्वा वङ्क्षणौ वा समाश्रयन् १०५
गृहीत्वा पायुहृदये क्षीणदेहस्य वा बली
मलान् बस्तिशिरो नाभिं विबद्ध्य जनयन् रुजम् १०६
कुर्वन् वङ्क्षणयोः शूलं तृष्णां भिन्नपुरीषताम्
श्वासं वा जनयन् वायुर्गृहीत्वा गुदवङ्क्षणम् १०७
वितत्य पर्शुकाग्राणि गृहीत्वोरश्च मारुतः
स्तिमितस्याततात्क्षस्य सद्यो मुष्णाति जीवितम् १०८
सहसा ज्वरसन्तापस्तृष्णा मूर्च्छा बलक्षयः
विश्लेषणं च सन्धीनां मुमूर्षोरुपजायते १०९
गोसर्गे वदनाद्यस्य स्वेदः प्रच्यवते भृशम्
लेपज्वरोपतप्तस्य दुर्लभं तस्य जीवितम् ११०
प्रवालगुलिकाभासा यस्य गात्रे मसूरिकाः
उत्पद्याशु विश्यन्ति न चिरात्स विनश्यति १११
मसूरविदलप्रख्यास्तथा विद्रुमसन्निभाः
अन्तर्वक्त्राः किणाभाश्च विस्फोटा देहनाशनाः ११२
कामलाऽक्ष्णोर्मुखं पूर्णं शङ्खयोर्मुक्तमांसता
सन्त्रासश्चोष्णताऽङ्गे च यस्य तं परिवर्जयेत् ११३
अकस्मादनुधावच्च विघृष्टं त्वक्समाश्रयम्
चिन्दनोशीरमदिरा कुणपध्वाङ्क्षगन्धयः
शैवालकुक्कुट शिखाकुङ्कुमालमषीप्रभाः १
अन्तर्दाहा निरूष्माणः प्राणनाशकरा व्रणाः
यो वातजो न शूलाय स्यान्न दाहाय पित्तजः ११४
कफजो न च पूयाय मर्मजश्च रुजे न यः
अचूर्णश्चूर्णकीर्णाभो यत्राकस्माच्च दृश्यते ११५
रूपं शक्तिध्वजादीनां सर्वांस्तान्वर्जयेद्व्रणान्
विरामूत्रमारुतवहं कृमिणं च भगन्दरम् ११६
घट्टयन् जानुना जानु पादावुद्यम्य पातयन्
योऽपास्यति मुहुर्वक्त्रमातुरो न स जीवति ११७
दन्तैश्छिन्दन्नखाग्राणि तैश्च केशांस्तृणानि च
भूमिं काष्ठेन विलिखन् लोष्टं लोष्टेन ताडयन् ११८

हृष्टरोमा सान्द्रमूत्रः शुष्ककासी ज्वरी च यः
मुहुर्हसन् मुहुःक्ष्वेडन् शय्यां पादेन हन्ति यः ११९
मुहुश्छिद्राणि विमृशन्नातुरो न स जीवति
मृत्यवे सहसाऽतस्य तिलकव्यङ्गविप्लवः १२०
मुखे दन्तनखे पुष्पं जठरे विविधाः सिराः
ऊर्ध्वश्वासं गतोष्माणं शूलोपहतवङ्क्षणम् १२१
शर्म चानधिगच्छन्तं बुद्धिमान् परिवर्जयेत्
विकारा यस्य वर्धन्ते प्रकृतिः परिहीयते १२२
सहसा सहसा तस्य मृत्युर्हरति जीवितम्
यमुद्दिश्यातुरं वैद्यः सम्पादयितुमौषधम् १२३
यतमानो न शक्नोति दुर्लभं तस्य जीवितम्
विज्ञातं बहुशः सिद्धं विधिवच्चावचारितम् १२४
न सिध्यत्यौषधं यस्य नास्ति तस्य चिकित्सितम्
भवेद्यस्यौषधेऽन्ने वा कल्प्यमाने विपर्ययः १२५
अकस्माद्वर्णगन्धादेः स्वस्थोऽपि न स जीवति
निवाते सेन्धनं यस्य ज्योतिश्चाप्युपशाम्यति १२६
आतुरस्य गृहे यस्य भिद्यन्ते वा पतन्ति वा
अतिमात्रममत्राणि दुर्लभं तस्य जीवितम् १२७
यं नरं सहसा रोगो दुर्बलं परिमुञ्चति
संशयप्राप्तमात्रेयो जीवितं तस्य मन्यते १२८
कथयेन्न च पृष्ठोऽपि दुःश्रवं मरणं भिषक्
गतासोर्बन्धुमित्राणां न चेच्छेत्तं चिकित्सितुम् १२९
यमदूतपिशाचाद्यैर्यत्परासु रुपास्यते
घ्नद्भिरौषधवीर्याणि तस्मात्तं परिवर्जयेत् १३०
आयुर्वेदफलं कृत्स्नं यदायुर्ज्ञे प्रतिष्ठितम्
रिष्टज्ञानादृतस्तस्मात्सर्वदैव भवेद्भिषक् १३१
मरणं प्राणिनां दृष्टमायुःपुण्योभयक्षयात्
तयोरप्यक्षयाद्दृष्टं विषमापरिहारिणाम् १३२

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां
द्वितीये शारीरस्थाने विकृतिविज्ञानीयो नाम पञ्चमोऽध्यायः ५

षष्ठोऽध्यायः

अथातो दूतादिविज्ञानीयं शारीरं व्याख्यास्यामः
इति ह स्माहुरात्रेयादयो महर्षयः
पाखण्डाश्रमवर्णानां सवर्णाः कर्मसिद्धये
त एव विपरीताः स्युर्दूताः कर्मविपत्तये १
दीनं भीतं द्रुतं त्रस्तं रूक्षामङ्गलवादिनम्
शस्त्रिणं दण्डिनं षण्ढं मुण्डश्मश्रुजटाधरम् २
अमङ्गलाह्वयं क्रूरकर्माणं मलिनं स्त्रियम्
अनेकं व्याधितं व्यङ्गं रक्तमाल्यानुलेपनम् ३
तैलपङ्काङ्कितं जीर्णविवर्णार्द्रैकवाससम्
खरोष्ट्रमहिषारूढं काष्ठलोष्टादिमर्दिनम् ४
नानुगच्छेद्भिषग्दूतमाह्वयन्तं च दूरतः
अशस्तचिन्तावचने नग्ने छिन्दति भिन्दति ५
जुह्वाने पावकं पिण्डान् पितृभ्यो निर्वपत्यपि
सुप्ते मुक्तकचेऽभ्यक्ते रुदत्यप्रयते तथा ६
वैद्ये दूता मनुष्याणामागच्छन्ति मुमूर्षताम्
विकार सामान्य गुणे देशे कालेऽथवाभिषक् ७
दूतमभ्यागतं दृष्ट्वा नातुरं तमुपाचरेत्
स्पृशन्तो नाभिनासास्यकेशरोमनखद्विजान् ८
गुह्यपृष्ठस्तनग्रीवा जठरानामिकाङ्गुलद्यः
कार्पासबुससीसास्थि कपालमुशलोपलम् ९
मार्जनीशूर्पचैलान्त भस्माङ्गारदशातुषान्
रज्जूपानत्तुलापाशमन्यद्वा भग्नविच्युतम् १०
तत्पूर्वदर्शने दूता व्याहरन्ति मरिष्यताम्
तथाऽधरात्रे मध्याह्ने सन्ध्ययोः पर्ववासरे ११
षष्ठीचतुर्थीनवमीराहु केतूदयादिषु
भरणीकृत्तिकाऽश्लेषा पूर्वाऽद्रापैत्र्यनैर्ऋते १२
यस्मिंश्च दूते ब्रुवति वाक्यमातुरसंश्रयम्
पश्येन्निमित्तमशुभं तं च नानुव्रजेद्भिषक् १३
तद्यथा विकलः प्रेतः प्रेतालङ्कार एव वा

छिन्नं दग्धं विनष्टं वा तद्वादीनि वचांसि वा १४
रसो वा कटुकस्तीव्रो गन्धो वा कौणपो महान्
स्पर्शो वा विपुलः क्रूरो यद्वाऽन्यदपि तादृशम् १५
तत्सर्वमभितो वाक्यं वाक्यकालेऽथवा पुनः
दूतमभ्यागतं दृष्ट्वा नातुरं तमुपाचरेत् १६
हाहाक्रन्दितमुत्क्रुष्टमाक्रुष्टं स्खलनं क्षुतम्
वस्त्रातपत्रपादत्रव्यसनं व्यसनीक्षणम् १७
चैत्यध्वजानां पात्राणां पूर्णानां च निमज्जनम्
हतानिष्टप्रवादाश्च दूषणं भस्मपांसुभिः १८
पथःच्छेदोऽहिमार्जार गोधासरठवानरैः
दीप्तां प्रति दिशं वाचः क्रूराणां मृगपक्षिणाम् १९
कृष्णधान्यगुडोदश्विल्लवणा सवचर्मणाम्
सर्षपाणां वसातैलतृणपङ्केन्धनस्य च २०
क्लीबक्रूरश्वपाकानां जालवागुरयोरपि
छर्दितस्य पुरीषस्य पूतिदुर्दर्शनस्य च २१
निःसारस्य व्यवायस्य कार्पासादेररेरपि
शयनासनयानानामुत्तानानां तु दर्शनम् २२
न्युब्जानामितरेषां च पात्रादीनामशोभनम्
पुंसंज्ञाः पक्षिणो वामाः स्त्रीसंज्ञा दक्षिणाः शुभाः २३
प्रदक्षिणं खगमृगा यान्तो नैवं श्वजम्बुकाः
अयुग्माश्च मृगाः शस्ताः शस्ता नित्यं च दर्शने २४
चाषभासभरद्वाज नकुलच्छागबर्हिणः
अशुभं सर्वथोलूकबिडालसरठेक्षणम् २५
प्रशस्ताः कीर्तने कोलगोधाहिशशजाहकाः
न दर्शने न विरुते वानरर्क्षावतोऽन्यथा २६
धनुरैन्द्रं च लालाटमशुभं शुभमन्यतः
अग्निपूर्णानि पात्राणि भिन्नानि विशिखानि च २७
दध्यक्षतादि निर्गच्छद्वृक्ष्यमाणं च मङ्गलम्
वैद्यो मरिष्यतां वेश्म प्रविशन्नेव पश्यति २८
दूताद्यसाधु दृष्ट्वैवं त्यजेदार्तमतोऽन्यथा

करुणाशुद्धसन्तानो यत्नतस्तमुपाचरेत् २९
दध्यक्षतेक्षुनिष्पावप्रियङ्गु मधुसर्पिषाम्
यावकाञ्जनभृङ्गारघराटादीप सरोरुहाम् ३०
दूर्वार्द्रमत्स्यमांसानां लाजानां फलभक्षयोः
रत्नेभपूर्णकुम्भानां कन्यायाः स्यन्दनस्य च ३१
नरस्य वर्धमानस्य देवतानां नृपस्य च
शुक्लानां सुमनोवालचामराम्बरवाजिनाम् ३२
शङ्खसाधुद्विजोष्णीषतोरणस्वस्तिकस्य च
भूमेः समुद्धतायाश्च वह्नेः प्रज्वलितस्य च ३३
मनोज्ञस्यान्नपानस्य पूर्णस्य शकटस्य च
नृभिर्धेन्वाः सवत्साया वडवायाः स्त्रिया अपि ३४
जीवञ्जीवकसारङ्ग सारसप्रियवादिनाम्
हंसानां शतपत्राणां बद्धस्यैकपशोस्तथा ३५
रुचकादर्शसिद्धार्थरोचनानां च दर्शनम्
गन्धः सुसुरभिर्वर्णः सुशुक्लो मधुरो रसः ३६
गोपतेरनुकूलस्य स्वनस्तद्वद्गवामपि
मृगपक्षिनराणां च शोभिनां शोभना गिरः ३७
छत्रध्वजपता कानामुत्क्षेपणमभिष्टुतिः
भेरीमृदङ्गशङ्खानां शब्दाः पुण्याहनिःस्वनाः३८
वेदाध्ययनशब्दाश्च सुखो वायुः प्रदक्षिणः
पथि वेश्मप्रवेशे च विद्यादारोग्यलक्षणम् ३९
इत्युक्तं दूतशकुनं स्वप्नानूर्ध्वं प्रचक्षते
स्वप्ने मद्यं सह प्रेतैर्यः पिबन् कृष्यते शुना ४०
स मर्त्यो मृत्युना शीघ्रं ज्वररूपेण नीयते
रक्तमाल्यवपुर्वस्त्रो यो हसन् ह्रियते स्त्रिया ४१
सोऽस्रपित्तेन महिषश्ववराहोष्ट्रगर्दभैः
यः प्रयाति दिशं याम्यां मरणं तस्य यक्ष्मणा ४२
लता कण्टकिनी वंशस्तालो वा हृदि जायते
यस्य तस्याशु गुल्मेन यस्य वह्निमनर्चिषम् ४३
जुह्वतो घृतसिक्तस्य नग्नस्योरसि जायते

पद्यं स नश्येत्कुष्ठेन चराडालैः सह यः पिबेत् ४४
स्नेहं बहुविधं स्वप्ने स प्रमेहेण नश्यति
उन्मादेन जले मज्जेद्यो नृत्यन् राक्षसैः सह ४५
अपस्मारेण यो मर्त्यो नृत्यन् प्रेतेन नीयते
यानं खरोष्ट्रमार्जारकपिशार्दूलसूकरैः ४६
यस्य प्रेतैः शृगालैर्वा स मृत्योर्वर्तते मुखे
अपूपशष्कुलीर्जग्ध्वा विबुद्धस्तद्विधं वमन् ४७
न जीवत्यक्षिरोगाय सुर्येन्दुग्रहणेक्षणम्
सूर्याचन्द्रमसोः पातदर्शनं दृग्विनाशनम् ४८
मूर्ध्नि वंशलतादीनां सम्भवो वयसां तथा
निलयो मुराडता काकगृध्राद्यैः परिवारणम् ४९
तथा प्रेतपिशाचस्त्रीद्रविडान्ध्रगवाशनैः
सङ्गो वेत्रलतावंशतृणकराटकसङ्कटे ५०
श्वभ्रश्मशानशयनं पतनं पांसुभस्मनोः
मज्जनं जलपङ्कादौ शीघ्रेण स्रोतसा हृतिः ५१
नृत्यवादित्रगीतानि रक्तस्रग्वस्त्रधारणम्
वयोङ्गवृद्धिरभ्यङ्गो विवाहः श्मश्रुकर्म च ५२
पक्वान्नस्नेहमद्याशः प्रच्छर्दनविरेचने
हिरगयलोहयोर्लाभः कलिर्बन्धपराजयौ ५३
उपानद्युगनाशश्च प्रपातः पादचर्मणोः
हर्षो भृशं प्रकुपितैः पितृभिश्चावभर्त्सनम् ५४
प्रदीपग्रहनक्षत्र दन्तदैवतचक्षुषाम्
पतनं वा विनाशो वा भेदनं पर्वतस्य च ५५
कानने रक्तकुसुमे पापकर्मनिवेशने
चितान्धकारसम्बाधे जनन्यां च प्रवेशनम् ५६
पातः प्रासादशैलादेर्मत्स्येन ग्रसनं तथा
काषायिणामसौम्यानां नग्नानां दराडधारिणाम् ५७
रक्ताक्षाणां च कृष्णानां दर्शनं जातु नेष्यते
कृष्णा पापाननाचारा दीर्घकेशनखस्तनी ५८
विरागमाल्यवसना स्वप्ने कालनिशा मता

मनोवहानां पूर्णत्वात्स्रोतसां प्रबलैर्मलैः ५९
दृश्यन्ते दारुणाः स्वप्ना रोगी यैर्याति पञ्चताम्
अरोगः संशयं प्राप्य कश्चिदेव विमुच्यते ६०
दृष्टः श्रुतोऽनुभूतश्च प्रार्थितः कल्पितस्तथा
भाविको दोषजश्चेति स्वप्नः सप्तविधो मतः ६१
तेष्वाद्या निष्फलाः पञ्च यथास्वप्रकृतिर्दिवा
विस्मृतो दीर्घह्रस्वोऽति पूर्वरात्रे चिरात्फलम् ६२
दृष्टः करोति तुच्छं च गोसर्गे तदहर्महत्
निद्रया वाऽनुपहतः प्रतीपैर्वचनैस्तथा ६३
याति पापोऽल्पफलतां दानहोमजपादिभिः
अकल्याणमपि स्वप्नं दृष्ट्वा तत्रैव यः पुनः ६४
पश्येत्सौम्यं शुभं तस्य शुभमेव फलं भवेत्
देवान् द्विजान् गोवृषभान् जीवतः सुहृदो नृपान् ६५
साधून् यशस्विनो वह्निमिद्धं स्वच्छान् जलाशयान्
कन्याः कुमारकान् गौरान् शुक्लवस्त्रान्सुतेजसः ६६
नराशनं दीप्ततनुं समन्ताद्रुधिरोक्षितम्
यःपश्येल्लभते यो वा छत्रादर्शविषामिषम् ६७
शुक्लाः सुमनसो वस्त्रममेध्यालेपनं फलम्
शैलप्रासादसफलवृक्षसिंहनरद्विपान् ६८
आरोहेद्गोश्वयानं च तरेन्नदह्रदोदधीन्
पूर्वोत्तरेण गमनमगम्यागमनं मृतम् ६९
सम्बाधान्निःसृतिर्देवैः पितृभिश्चाभिनन्दनम्
रोदनं पतितोत्थानं द्विषतां चावमर्दनम् ७०
यस्य स्यादायुरारोग्यं वित्तं बहु च सोऽश्नुते
मङ्गलाचारसम्पन्नः परिवारस्तथाऽतुरः ७१
श्रद्दधानोऽनुकूलश्च प्रभूतद्रव्यसङ्ग्रहः
सत्त्वलक्षणसंयोगो भक्तिर्वैद्यद्विजातिषु ७२
चिकित्सायामनिर्वेदस्तदारोग्यस्य लक्षणम्
इत्यत्र जन्ममरणं यतः सम्यगुदाहृतम् ७३
शरीरस्य ततः स्थानं शारीरमिदमुच्यते ७३ १२

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां
द्वितीये शारीरस्थाने दूतादिविज्ञानीयो नाम षष्ठोऽध्यायः ६

समाप्तं चेदं द्वितीयं शारीरस्थानम्